श्रीमुरलाचार्यकृतआर्याप्रारंभः॥श्रीरामचंद्र॥

श्रीगणेशायनः सीतालतासमासक्तरामकल्पमहीरुहं सफलंशीतलछायंश्रांतिभ्रांतिरंभजे १ श्रीमन्मुद्गलभट्टेनरामचंद्रप्रभोःकृता आर्यावृत्तस्तुतिस्तस्याव्याख्यानंक्रियतेस्फुटं २ तत्रप्रथमवृत्तंत्वयीतिहेरामचंद्रत्वयिसकलंतर्यामिणीश्वरेविमुखेननुकूलेसति श्रवणादिभक्त्यानाराधितत्वादित्यर्थः किंलक्षणेत्वयिमखमुख्येमखेषुयज्ञेषुमुख्येप्रधानेयज्ञोवैविष्णुरितिश्रुतेः। ईज्यत्वेनक

त्वयिविमुखेमखमुख्येसख्येनान्यस्यकस्यजीवामि जीवामितभवदर्पितवसनाशनमात्रजीवनाःसर्वे १
परितःपश्यसिपरितःशृणोषिपरितोजगद्भिजानासि मांरामकिंतदंतर्नशृणोषिन वीक्षसेनवावेत्सि २

र्मफलदातृत्वेनवामुख्यत्वं एवंभूतंत्वांविहायान्यस्यदेवतांतरस्यसख्युर्भावः सख्यंतेनसख्येनानुकूलेनजीवामिजीविष्यामि वर्तमानसामीप्येवर्तमानवद्वाऽतिभविष्यद्वर्तमानसामीप्येलट्तवतस्यममवाणीसमानमन्यत् १ किंमांनवीक्षसेकिंनवेत्स्यपितुवेत्सीत्यर्थः सर्वज्ञत्वादितिभावः २

ननुलौकिकदृष्टांतेनत्वंमांजानासित्वामहंनजानामितिचेत्तत्राह जानातीति। भूपंअल्पःदरिद्रःजानातिअल्पंभूपःनजानातीत्येतत्त्वय्यनुपपन्नंउचितंयोग्यंसकलमवित्तेभूपेसर्वज्ञत्वाभावादित्यर्थः सर्वज्ञेत्वय्यदःदंसकलंकथंश्लाघ्यं।नश्लाघ्यमित्यर्थः॥ किंतुसर्वज्ञत्वात्सकलानुसंधानंनवयोग्यमितिभावः २ पुनरपिश्लोकदृष्टांतमाशंक्याह अर्थिनीति अर्थिनिमार्गकेलिप्सानकृत्यप्राप्तिरूपेछाविलसत्यविर्भवतिदातरिदित्सातुदूरतोपास्तांदातरिदानेछाविलसत्यविर्भवतिदातरिदित्सातुदूरतोपा

जानातिभूपमल्पोनाल्पंजानातिभूपइत्येतत् उचितंसकलमवित्तेसर्वज्ञेत्वय्यदःकथंश्लाघ्यं २ अर्थि
निविलतिलिप्सादातरिदित्सातुदूरतोपास्तां आस्तांकृपणकथेयंरमापतेरमनोचितंभवति ४

नास्तीत्यर्थः लोकीकदृष्टांतेषुकृपणकथासंभवति दातुःकृपणत्वादितिभावः त्वयितुकृपणकथेयमास्तांनित्यंभवति कुतूहेरमापते।इतिहेतुगर्भसंबोधनंलक्ष्मीपतित्वाद्धेतोरौदार्यशक्तिगुणयुक्तेभवतित्वयिकृपणकथनोचितानयोग्यारमापतित्वात्॥ तवकृपणकथानसंभवतीतिभावः ४

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

इदानीलोकिकदृष्टांतेनोपालंभयंप्रार्थयति अपिरंकमिति रंकंदरिद्रंपितरंकनिष्ठोर्भकःउत्संगचिन्हयोयंकश्चित्यमरः॥उ
त्संगेस्थितःबालःकिंचित्प्रियंप्रार्थयमानःस्वेष्टंप्रार्थितंनादृशादपिपितुर्लभते॥इदंतुकष्टंगहनं॥अथवाकष्टंक्लेशइत्य
र्थः॥कष्टंतुरुछ्रगहनेत्यमरः॥जगदुद्भवः॥उद्भवत्यस्मादितिद्भवः॥उत्पत्तिकारणंजगदुद्भवइतिविश्वः॥अत्रप्रमाणं॥
योदेवानांप्रभवोद्भवश्चेतिश्रुतेः॥जगदुत्पत्तिकारणभवरंकगतः॥उत्संगगतोप्यहंममेष्टभवत्प्राप्तिलक्षणं॥भ

अपिरंकमंकनिष्ठःप्रार्थयमानोर्भकोलभतेष्टं॥कष्टंबतजगदुद्भवभवरंकगतोलभेनतद्भवतः॥५॥
आशापाशनिबद्धंकारागारेकलेवरेनिहितं॥यदिमोचयसिनमांत्वंकुरुतर्हिस्वात्मनैवमेरतिं॥६॥

वतःकष्टंबतमहत्कष्टंगहनमित्यर्थः॥इदानींनियम्यनियामकभावेनप्रार्थनांकरोति॥आशापाशनिबद्धमिति॥आशै
वपाशःआशापाशःतेननिबद्धंकारागारेकलेवरेनिहितं॥कारागारेकारागारसदृशे॥कलेवरेशरीरेनिहितंनिक्षिप्तं॥
लोकेयोत्यंतापराधीनंबध्नातिकारागारेनिक्षिपतिदुष्टदुःखकरत्वादित्यर्थः॥हेरामतस्मात्कलेवरलक्षणात्कारागारा
त्मांयदिनमोचयसि॥ननिष्कासयसि॥तर्हित्वात्मनैवमेरतिंकुरुघटमेवजीवनोपायंकुर्वित्यर्थः॥तवभजनानुसंधाननैवममजीव
नंसार्थकतायथाभविष्यतितथात्वमेवसंपादयेतिभावः॥६॥७

पुनरपिप्रभुभूपालंभयतिअनुचितमिति।हेरामनाथरिरमेवानुचितमेवारौकिंतस्त्रीमद्वारिस्थितोप्यहंदीनः॥सर्वसंपत्तिपूर्णस्यभगवतःसंनिधौ
सेवकत्वेनस्थितोप्यहंदीनोनवास्मनाममएतेति॥हेरामत्वत्सेवकत्वंस्यापिममतदनुमानबाधीनाहतिस्तदनुईश्वरस्वरूपादनुहीनायेमानवास्त
दधीनाहीनेत्यनेनसूत्रेणानोःकर्मप्रवचनीयसंज्ञायांतद्योगेतरितिद्वितीयामनुस्थाधीनाजीवंत्वांनव्यथयतिकथंसमजीवनंचिंतांन
करोषीत्यनुचितमितिभावः ७ इदानींभगवतःसामर्थ्यकथनपूर्वकमुपालंभंकरोतिननुत्वंचरेन्येनपीड्यसेअन्यमानबाधीनरतिन
याचतस्त्रमथाकिमपराध्येयेनमय्यनौचित्यंरूपेत्यत्राह॥त्रिभुवनेति हेत्रिभुवनपालनदीक्षित।त्रयाणांभुवनानांसमाहारस्त्रिभुवनं

अनुचितमिदमेवादौश्रीमद्वारिस्थितोप्यहंदीनः॥व्यथयतिकथंनहिस्वांममहतिनिस्तदनुमानबाधीना॥७॥
त्रिभुवनपालनदीक्षितरक्षणशक्तिस्त्वाक्षतापीयं॥सामान्यमिवविशेषंकिंमांपरिहृत्यसर्वतःस्फुरति॥८॥

मात्रादित्वात्स्त्रीत्वाभावेनपुंसकता॥तस्यपालनंतेनदीक्षितसंजातदीक्षतरूपादीक्षासंजाताअस्येतित्रिभुवनपालनदीक्षित।तारकादित्वादीक्ष
तेर्यनियमेनानुष्ठीयमानतयागृह्यतेतयूत्पत्तिमित्युच्यते॥गृहीतत्रिलोकीपालनव्रतरामतवेयंकायरूपेणपरिदृश्यमानारक्षणशक्तिः॥प
लनसामर्थ्यंकिमितिमांपरिहृत्यमांविहायसर्वतः।सर्वत्रसार्वविभक्तिकसिःस्फुरतिकार्यकारिणीवर्तातसर्वान्भरतिमामेवकुतोजहातीत्य
र्थः॥अखिललोकप्रतिपालनव्रतशालिनःपरमसमर्थस्यत्वमसदृशत्यागोनुचितइतिभावःनान्यथोर्हिकृशक्तिः॥सर्वत्रपरिदृश्यमान
पिकचित्सूत्रमात्रेपिकुंठिताभवति॥तदत्रसर्वत्रवर्तमानापिमद्रक्षणशक्तिःत्वयिकुंठिताभवतिचेत्तत्राह॥कथंभूताक्षताकेनाप्यप्रति

हता॥ दाहशक्तिः मण्यादिनाप्रतिहन्यतेतत्रकिंस्त्रीत्वेनापिप्रतिहंतुंसशक्यतेसर्वोधीश्चरत्वात्तवेत्यर्थः॥ किंयथाकिंचिद्विहायसर्वत्रप्रवर्तते॥ सामान्यंसामान्यशास्त्रंविशेषंतंविषेधशास्त्रविषयंपरिहृत्ययथासर्वत्रप्रवर्तते॥ तद्वत्॥ तद्यथा॥ नहिस्यात्सर्वाणिभूतानीतिसामान्यशास्त्रंश्रीषोमीयंपशुमालभेतेतिविशेषशास्त्रविषयंयागीयंपशुंहिंसापरिहृत्यप्रवर्ततेसर्वत्रहिंसामात्रेप्यथवाब्राह्मणेषुरुधिरंप्रायतिकौडिन्येतुविशेषवाक्यदृष्येब्राह्मणेभ्योरुधिरंदीयतामित्यत्रत्सर्गः॥ तत्रकौडिन्यायेतिविशेषविषयंविहायान्यब्राह्मणेषुरुधिरंप्रापयति॥ कौडिन्येतुविशेषवाक्येनबाधितः मन्नप्रवर्ततेउभयोःशास्त्रयोःयास्यावकाशंतद्दुर्बलंयंतिरवकाशंतत्प्रबलं॥ अतोदुर्बलत्वात्सामान्यशास्त्रंप्रबलंविशेषशास्त्रंविषयंविहायप्रवर्तते॥ प्रबलेनदुर्बलबाधात्उचितमुत्सर्गस्यदुर्बलस्यप्रबलविशेषस्यविषयेअप्रवर्तनंतवरक्षणशक्तेःमयिअप्रवर्तनमनुचितंप्रतिबंधकाभावात्॥ ईश्वरशक्तेः सर्वापेक्षयाबलीयस्त्वाच्च॥ अक्षन्तापिमयिनस्फुरितिकुंठिताभवतीत्यपिनात्यनोचित्यंद्योत्यते॥ ननुत्वद्भाग्यवशादहंतवालनेस्वशक्तिंनप्रेरयामिइतिचेंहिजितमद्भाग्यमहिनायेनरत्नवानापिसमर्थोपिलंतत्यागरूपनुचितंपथंपदेकारितोसि॥ नेतद्योग्यभगवत्स्वेत्यपालंभोक्तिः॥ यद्वानवनायंदोषः॥ यन्मामुपेक्षसेकिंतुममैवदोषादोषोपेक्षाहेत्याह॥ सर्वपालनरतस्यापित्वेयमक्षन्तापिशक्तिः॥ किमांकुत्सितम्भ्वासावहंचकिमहंतंकिमामिति॥ समस्तपदंकिंक्षेपइतिसमासः॥ अनेकदोषयुक्त्वात्कुत्सितंमांविहायसर्वतःस्फुरतीतियुक्तमेवयथाब्राह्मणायगोर्दद्यात्इतिउत्सर्गः॥ दुर्ब्राह्मणायनदेयेतिविशेषविषयदुर्ब्राह्मणंनप्रवर्ततेतद्वत्॥ यद्वाकाणादिसमयेसामान्यंजातिविशेषंविशेषनामकंपदार्थंपरिहृत्यउपलक्षणमेतत्समवायाभावयोः॥ जात्यक्षिकाणत्वायोग्यत्वात्॥ तस्मादेवदोषात्विशेषादीन्विहायसर्वत्रान्यत्रदयादौस्फुरति॥ तद्वत्तेषांसिद्धांतेविशेषादिषुजातिर्नास्तीतिस्थितिः॥ अतोमद्दोषेणेवदेवीदासन्यंनतगात्रकरांघ्रिरपराधः॥ उक्तंच॥ कल्पांबुधेरायथावातायनकामचारोमयिशंकनीयः॥ मैवंजन्मांतरपातकानांविपाकविस्फूर्जथुरप्रसह्यः॥ इतिथापित्वद्दारिलुंठंकाकुनिर्विलपंतंदीनंमांमहादोषाकरमपिस्वमहिम्नादोषानपनीयपालयईश्वरत्वात्॥ परंतुनान्याधीनंकुर्वीतिभावः॥ ८॥ ॥ ॥ ॥ ॥ ॥ ॥ २

ननुत्वमपराधानांराशिरसीत्यतस्तवोपेक्षेतिचेत्तत्रार्थनोपेक्षेचितेतिवदति॥ यदीति॥ यदिपुनरपराधानमविनयानांकोटिभिःसमूहैःअंतर्विषादंमनसिक्रोधंसमायासिनेदंउचितंतवदयालुत्वादित्यर्थः॥ हेरामप्रारुतश्लोकेपिबालैः जननीपत्ताडितापिकिंरुष्यति अपितुबहुरुष्यतिरुपाक्षरणस्तनपानादिकारयेत्येव॥ मानुषीसतीत्वंतुदेवीस्वीत्यत्र उपेक्षाकरणंनोचितमितिभावः॥ इदानींस्वस्मिन्नपराधित्वमंगीकृत्याहममकोवापराधइतिष्टछति॥ ९॥ अयीतिहेराघवतथ्यंवदसत्यं

यदिपुनरपराधानांकोटिभिरंतरविषादमायासि॥ पत्ताडितापिबालैरुष्यतिकिमपीहमानुषीजननी॥
॥९॥अयिवदराघवतथ्यंकोपोयंकेनमदपराधेन॥शपथस्तेदाशरथेदशरथपदयोर्यदन्यथाब्रूषे॥१०॥॥

ब्रूहितवायंकोपः॥ निर्दयत्वव्यंजकलक्षणःकेनमदपराधोनास्तीत्यन्यथावदनंनकर्तव्यमितिभावः॥ मातरवसिष्ठादीन्गुरूंश्चपरिहृत्यदशरथपदयोरेवशपथःकिमितिचेन्मातृणामाज्ञांवसिष्ठादीनामाज्ञामनंगीकृत्यादरेणपितुर्दशरथस्यैवाज्ञांस्वीकृतवान्॥ पुत्रधर्मेपरिनिष्ठितोजीवतोवाक्यकरणमित्यादिरूपेणुरर्वर्थेसक्तराज्योदशरथस्यार्थेसंयक्तराज्यादिनैभवोरामस्तच्चरणयोःशपथेदत्तेनानृतंवदिष्यतीत्याशयेनेत्यर्थः॥ लोकेपिपुत्रस्यपितुःशपथव्यवहारःप्रसिद्धः॥ १०॥ ॥ ॥ ॥

दृशानींसर्वात्मकत्वाद्दयालुत्वाच्चममक्लेशान्दृष्ट्वादयावश्यंकर्तव्यमितिप्रार्थयति ॥ मामितिहेरामेहास्मिन्संसारेमांरुपणमनाथं दरिद्रमन
न्यस्वामिनंक्लेशेर्व्याप्तंक्लेशास्तुयोगशास्त्रोक्ताअविद्यास्मितारागद्वेषाभिनिवेशाः पंचतेर्व्याप्तंचित्तंरमेशरमापतेकथंभूतैः क्लेशैः निः
शेषैः समग्रैः किंभूतंमांलोलद्भुजपद्मस्तकंसाष्टांगंयथाभवतितथाप्रणमंतमित्यर्थः ॥ एतादृशंममावलोक्यकथंस्थितोसितूष्णी
दयानिधेरिदंतवनोचितमितिभावः केचिदेवंव्याचक्षतेविषयविषव्याप्त्याव्याकुलशरीरंमांदृष्ट्वातूष्णीमवस्थानंदयालोस्तवनो
चितमितिप्रार्थनासमयेअपरिचयामाकरिति ॥ ११ ॥ ननुमयिदयालुत्वंकुतोवगतमित्याशंक्याह ॥ हेरामकरुणाकरइति ॥

मामिहरुपणमनाथंक्लेशैर्व्याप्तंरमेशनिःशेषैः ॥ लोलद्भुजपद्मस्तकमवलोक्यकथंस्थितोसितूष्णीं ।
॥ ११ ॥ करुणाकरइत्याद्यानरथैरुपयातिबिरुदमालाते ॥ शरणागतमितिरुपणंकिंमांसमुपेक्षसेरघूत्तंस ॥ १२ ॥ ॥

हेरामकरुणाकरइत्याद्याबिरुदमालालक्षणसमूहोदीनदयाकरेतिपुराणप्रसिद्धासारथैरथारिवाहनैनीपथानिवाहयितुमशक्यादि
गुरुत्वादितिभावः ॥ बहुवचनांतपाठेतानहयिनुमशक्यास्तासांबहुत्वादिति ॥ अतोशरणागतमितिरुपणंअत्यंतरुपणंस्वरूप
नभिज्ञं ॥ योवाअेतदक्षरंगार्ग्योथविदित्वाप्रैतिसरुपणइतिश्रुतेः ॥ हेतादृशंमांहेरघूत्तंसरघुकुलभूषणकिंसमुपेक्षसे
उपेक्षांकरोषीति ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २

करुणादिलक्षणानांबाहुल्यात्श्रुतिस्मृतिपुराणगीतत्वाच्चमयिकरुणापश्यंकर्तव्येतिप्रार्थयति ॥ हेराघवयस्मात्त्वमेवंभूतस्तस्मात्त्वंमयि
दीनेनाथेकरुणांकुरु ॥ किंविधेमयित्वांशरणमापन्नेशरणागतेमयिकरुणांनकरोषिचेच्छरणागतवत्सलइति ॥ विष्टपगीतंबिरुदंवेदा
दिभिस्तत्तंजसनाविनामयीकस्यापिकिमपिनदीयतइतिहिह्रीसजेत्यर्थः ॥ ओहाक्त्यागेअस्माद्धातोर्क्तिआचहावितिसूत्रेणजहाहि
जहिजहिहिरूपत्रयं ॥ १३ ॥ दृशानींस्वयैवंवाचेतदर्थंनदति ॥ सेवामितिसेवामपेक्ष्यतादाताससेवांगृहीत्वादृशातिसदातानभवति

कुरुवाराघवकरुणांमयिदीनेत्वांहिशरणमापन्ने ॥ शरणागतवत्सलइतिविष्टपगीतंजहीहियाबिरुदं ॥ १३ ॥
सेवामपेक्ष्यदातानहिदाताकिंतुवेतनादाता ॥ सेवाहीनेदीनेपल्वलइवदेहिजीवनंधनवत् ॥ ॥ १४ ॥

किंतुवेतनादाता ॥ वेतनानामयस्यंयादृसीसेवातामपेक्ष्यतस्यतावच्छब्दादिदानमितिवेतनाशब्दार्थः ॥ तस्माद्दातृत्वंकिंनामेत्याकां
क्षायांवदतिसेवाहीनेदीनेसेवारहितेनान्यथेयः ॥ दातादृशातिसदाता ॥ तत्रदृष्टांतः ॥ यथापल्वलेअरघातात्यच्छसरोवरेसेवा
हीनेक्लेशेपिधनःजीवनंप्रयच्छतितद्वत् ॥ तथापिममसेवामनपेक्ष्येवकृपयिष्येतिभावः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

ननुस्वामिभिरेवंवक्तव्यंतवपूर्वजैःसेवयैवमतःकिंचित्प्राप्तमितिनवापिसेवापेक्ष्यतेतोवदति॥सेवकवंशभवत्वादिति॥सेवकवंशभवत्वादपेक्षसे॥सेवांमयाऋतांसेवकवंशजोहमितिमत्कृतांसेवांप्रतीक्षसेचेत्वयिनायोग्यंकुतः॥यतोऽलसमपिसेवांकर्तुमियोग्यमपिसेवकंकृतंपृथ्वीशः॥महाराजाः॥तादृशमपिपरिपालयंरक्षंभोराघवत्वंनिभुवनाधीशोत्वयावश्यमहंपालनीयइतिभावः॥ ॥१५॥

सेवावंशभवत्वादपेक्षसेचेन्मयाऋतांसेवां॥अलसंसेवकंकृतमपिराघवपरिपालयंतिपृथ्वीशाः॥१५॥
नहिनिजजाठरवन्हेर्जायायमत्पूर्वजार्जितोसित्वं॥किंत्वलालससंततिसंततपीडापरंपराशांत्यै॥१६॥ ॥

हेश्रीरामचंद्रमत्पूर्वजैस्त्वोदरपूरणार्थमेवनाराधितोस्यपितुसंततिरक्षणार्थमपीत्याशंक्याह॥नहीति॥नहिनिजजाठरजवन्हेर्जायायमत्पूर्वजार्जितोसित्वंनिजःस्वकायोयोजाठरवन्हिर्वैश्वानरस्तस्यजायायान्नपानादिनातृप्त्यर्थंमत्पूर्वजैर्भवित्रादिभिर्नोपार्जितोसिकिंत्वलालससंततिसंततपीडायपरंपरायास्तस्याःशांत्यैअलसायासंततिःपरंपरातस्याःसंततंनिरंपीडाशनवसनादिकृतादिःतस्याःशांत्यैतन्निवारणार्थमित्यर्थः॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ६

मोरयानिधेरयासमुद्भवियत्काठिन्यंमद्विषयकंनरेवममश्चर्यवद्भानीत्याह॥चित्तचमत्कृतकारणमिति॥चित्तचमत्कृतिकारणंममचित्तेचमत्कृतिकारणमाश्चर्यकारणंकिंतदित्याह॥इदमेवेहतावत्कारणंयन्मद्विषयकंभवत्कृपाश्रीमत्कृपाकाठिन्यंनिर्दयत्वंननुत्वयैवैवंवक्तव्यंमय्यियंकाठिन्यंनासीदिति॥तदातर्हिसेवकलोकेभृत्यादोमद्रूपेहलोकेशन्निभुवनपतेकिमिरंकगोरतांयासिगतोसिएतत्वयिसर्वैश्वरेनोचितमितिभावः॥१७॥ इदानींत्वंममजनकोस्यहंतवबालोस्मीतिमत्तोममोत्सितंरेहितिप्रार्थयति॥अंकेति॥भोप्रभोतवाऽंकेउत्संगेगतंपंकेसंतनिर्मलेपोष्यमा

चित्तचमत्कृतिकारणमिदमिहतावद्भवत्कृपाकाठिन्यं॥तदनुचसेवकलोकेशकथंकृपारतांयासि॥१७॥अंके
तवगतपंकेलंकेशरिपोरतिपोष्यमासीनं॥त्वन्मुखसौरभचर्चितनाबूलाद्यांशिशुंप्रभोपाहि॥१८॥चु
बुकंसमुखतायैकरेणकर्षंतमर्भकंमातः॥सिंदूराचलवासिनिमामिहरामाभिधेप्रोभोपाहि॥१९॥

सीनंस्थितंशिशुंपाहिरक्षयहेलंकेशरिपोशत्रुघ्नकथंभूतंशिशुंत्वन्मुखसौरभचर्चितनाबूलाद्यैरं॥भवत्वन्मुखसौगंधस्करभिमतंबूलंतस्याद्यांशियतेयस्यतंतांबूलाद्यं॥१८॥इदानींजननीरूपत्वेनस्तौतिचुबुकमिति॥हेसिंदूराचलवासिनिनानाभारूणाचलनासिनीत्यर्थः॥यद्वासिंदूराचलवासिनीरामक्षेत्रनिवासिनीतत्रस्थोभूधरःसिंदूराचलनाम्नातिप्रसिद्धः॥कथंभूतमर्भकंसत्मुखतायैमानत्चुबुकंमुखस्याधोभागंकरेणकर्षंतं॥बालानांस्वभावएवएषयन्मातासंमुखंनपश्यतिनेत्स्करेणस्वाभिमुखीकरणंस्वाभिमुखीकर्तुं मुखस्यक्रियते॥१९॥

ननुजगदीश्वरेदृश्येमयितवदृश्यतायोग्येसाशंक्याह॥उचितेति उचिताह्यदृश्यताउचितायोग्याह्यदृश्यतानाभानभिगम्यतानिकटेस्थित्वा संभाषणादिकरणाभावः॥साधुताप्रत्यर्थिनृपेषुप्रतिदूषुयोग्याउचितानार्भकेपोथेमप्युचिना॥तथाहिवत्सल्यतादृश्यतयोःसहावस्था नमनुचितंगोव्याघ्रस्येवबैरभावत्वात्॥गोश्चव्याघ्रश्चगोव्याघ्रयेषांचविरोधः शाश्वतीकृतिएकनद्भावः॥वात्सल्ययोग्येमप्यदृश्यतानसं भवतीतिभावः॥२०॥इदानींलौकिकदृष्टांतेनानुवदतिपितरावेति।हेरामयत्रपितरौजननीजनकोवेभिन्नौतत्रान्यतरेणजननीजनके नवाशिशोर्जीवनंपालनंभवति॥ममतुभयंमातापितृरूपंत्वमेवएवंसतिलंचेन्निष्करूणोभवसीतर्हिमयाकिंकर्तव्यं॥कस्याग्रेव

उचिताह्यदृश्यतातेप्रत्यर्थिनृपेषुनार्भकेपिमयि॥वत्सलतादृश्यतयोर्गोव्याघ्रस्येवयर्ततेवैरं॥२०॥
पितरौयत्रविभिन्नौतत्रान्यतरेणजीवनंहिशिशोः॥उभयंत्वमेवमेतस्त्वयिनिष्करूणेकरोमिकिंराम॥२१॥
नशृणोषिदीनभाषितमितिसर्वत्रेनशक्यतेवक्तुं॥श्रुत्वास्थितोसितूष्णीमित्यपिवचनंह्यनिधोनिंद्य॥२२॥

कव्यमितिभावः॥इदानींसर्वज्ञत्वात्करूणावचनानिममनशृणोत्यपिवक्तुंनशक्यतइत्याह॥२१॥शृणोषीति॥नशृणोषीदीनभाषां करूणावाणींनशृणोषिनाकर्णयसीत्यपिवक्तुंनशक्यतेसर्वज्ञत्वात्॥ननुतर्हिश्रुत्वातूष्णींस्थितोसीतिवाच्यंतदपिनसंभवतीति त्याह॥श्रुत्वेति॥श्रुत्वातूष्णींस्थितोसीत्यपिवचनंह्यनिधौकरूणासमुद्रेत्वयिनिंद्यमयोग्यंकरूणावंतईश्वराःदीन भाषांश्रुत्वातूष्णीनतिष्ठंतिकिंतूपकुर्वंतीतिभावः॥२२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननुरणालवोपिप्रभवोन्यस्यासंगासत्कास्यन्यवचनानिनाकर्णयतीत्याशंक्याह॥किंवेतिहेनानकीजानेजानकीजायायस्यस्जान कीजानिः॥जायायानिङ्॥इतिसूत्रेणनिङ्॥किंवातदुरुकार्यंयद्यासंगेनयत्रासक्तेनमेसमदीनानिवचनानि प्रगटंस्फुटंतवकर्णपथंनयांतिनप्राप्नुवंतिमहत्कार्यव्यासंगेनममभाषांनशृणोषीत्यर्थः॥इदानींयुष्मादृशातिश्रांतत्वान्निद्रागतत्वेननशृणोषीत्याशंक्याह॥२३॥प्रायइति॥हेरामप्रायोबहुधेवंलक्ष्यतेराक्षसयुक्षेसंतश्रांतत्वाछेषेनंतपर्यंकेसुखंयथास्यात्त

किंवातदुरुकार्यंयद्यासंगेनजानकीजाने॥दीनानिमेवचांसिप्रगटंनायांतिकर्णमार्गंते॥२२॥प्रायोराक्ष
सयुक्षेश्रांतःशेषनिद्रांसुखंशेषे॥यज्जल्पतोभूरांमेकरूणानिवचांसिनाधारयसि॥२३॥अ
पिदलतिवज्रहृदयंममदूचनैरोदितीवपाषाणः॥किंवामयापराधंयत्करूणाब्धिर्भवानुदासीनः॥२५॥

थाशेषेनिद्रितोसिननुनिद्रितोसिरतिकिमित्यारोप्यतेऽतआह॥यस्मात्कारणाद्भूशंजल्पतोमेत्यर्थंवदतोममकरूणानिवचांसिनाव धारयसिनाकर्णयसितत्तोलक्ष्यतेलोकेयाह्यासंतश्रमवशात्सुप्तोभवतिसः किमपिसंनजानातिनशृणोतीतिभावः॥२४॥इदा नींवचनेत्वंतकरूणामयत्वात्तानिश्रुत्वाचेतनाअपिद्रवंतीत्याशयेनाह॥अपिति॥अपिदलतिवज्रहृदयंममकरूणावचनैर्वज्रांतरमपिद लतिविदीर्णंभवतिपाषाणोपिरोदितीवरोदनंकरोतीव॥यद्यपिवज्रपाषाणादीनांदलनरोदनेनसंभवतस्तथाप्यत्यंतकरूणावज्ञानरूपिभवतिचेत्य र्थः॥हेरामएवंभूतेपिमयिकरूणाब्धिरपिभावानुदासीनइतिमहदाश्चर्यमितिभावः॥२५॥ ॥ ॥ ॥

इदानीमनन्यसेवकंकरुणावचननिजन्यंतंत्वयावगणितंमांलोकाउपहसंतीत्याशयेनाह ॥ जल्पंतंवारंवारंकरुणावचनान्युदीरयंतंअल्पबुद्धीमंतंमांत्वत्क
मामपश्यलोमवत्स्वरूपांगमपश्यंतः श्लोकाःस्थूलबुद्धयःउपहसंतिउपहासंकुर्वंतिमामपश्यंतःसंतःहेशोकारेरामशोकापहरणसमर्थरामचं
द्रतत्तवाश्लाघ्यमयोग्यंभवतिशीघ्रमेवस्वकीयेरूपाकर्तव्येतिभावः ॥ २६ ॥ इदानींअयंरांभिकोभवतीतिरूपाश्रीरामोनुग्रहंतदुपरिनकरोतीति
लोकशंकतेइत्याशयेनाह ॥ क्षीरेणेतिक्षीरेणदग्धस्निग्धःउष्णक्षीरेणज्वलितस्निग्धः पामरजनः मूर्खजनः शीतलंतकमपिस्फूत्कृत्यमुखंना
युनाशीतलंकृत्वापिबतिध्वलिमसाम्यात् ॥ तन्यायेनदंभिनंजनमवलोक्यमामपिदंभिनंमितिशोकोलोकः शंकतेतर्कयतिकिं

जल्पंतमल्पबुद्धिंपश्यंतस्त्वत्स्वरूपमपश्यंतः ॥ मामुपहसंतिलोकाःशोकारेरामतत्तवाश्लाघ्यं ॥ २६ ॥ दुग्धे
नदग्धस्निग्धस्तर्कंफूत्कृत्यपामरःपिबति ॥ दंभिनमवलोक्यजनस्तद्वन्मांशंकतेत्वयायुक्तं ॥ २७ ॥ म
यिकरुणामृदुभावायदिनाभीष्टंकरोषिमाकुरुतत् ॥ स्वस्वामिभावमीशस्वीयंमकृथीकुरुष्वशरण्ये ॥ २८ ॥

भूतंमांत्वयात्यक्तमननुगृहीतंतवानुग्रहाभावाद्दयमपिदांभिकभक्तइत्याशंकास्यमितिभावः ॥ २७ ॥ इदानींकरुणामृदुरपित्व
मयंपरकीयइतिप्रार्थितंनप्रयच्छसिमाप्रयच्छस्वामिसेवकभावंलेनावश्यमभीष्टंदेहीतिप्रार्थयतिमयीति ॥ ननुसंचयंई
जयएवतवाभीष्टंदास्यतिकिंमत्प्रार्थनयेतिचेतत्राह ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥ ६

पायसइवेति ॥ हेरामचंद्रयथापायसेपायसान्नेक्षिप्तंसर्पिःपुष्ट्यादिकार्यंकरोतितथाभस्मानिहितंक्षिप्तंकिंनामकरोतीतिवैधर्म्येदृष्टांतः
तद्वत्तवमंत्रजपःतवनामस्मरणंपापिनिमयिकिंनाभीष्टंप्रार्थितंकरोतुनकरोतीत्यर्थः ॥ २९ ॥ हेमूढममनामनीरंतवदोषाख्यंवह्निंप्र
शमयिष्यतिएवंचेतत्रपुनरपिस्वकीयेदोषादिष्करमेवकरोति ॥ संतप्तायसपिंडइति ॥ संतप्तायसपिंडेतप्तलोहपिंडेयार्यपिजलम
पिक्षिप्तंसत्भस्मीभवति ॥ तद्वन्नित्यशौचेचेनित्यंमलिनमयितवमंत्रजपोपिभस्मसाद्भवतिभस्मप्रायोभवतिमंत्रस्यतुभस्मीभवनंन

पायसइवरामसर्पिर्भस्मनिनिहितंकरोतिकिंनाम ॥ तद्वत्तवमंत्रजपःपापिनिमयिकिंकरोतिवाभीष्टं ॥ २९ ॥ संतप्ता
यसपिंडेवार्यपिभस्मीभवत्यक्षिप्तं ॥ नित्याशौचेतद्वन्मयिमंत्रजपोपिभस्मसाद्भवति ॥ ३० ॥ मालिन्यदो
षभीत्यापृथग्विधेयंतुभाषतेशोः किं ॥ मनःशरीरपापात्पापंकिंवाजपःकरोतिपृथक् ॥ ३१ ॥ ॥ ॥

सत्रिसत्वात् ॥ तथापिशुद्धलक्षलक्षणकार्यप्रतिबंधएवात्रलक्षणीयः ॥ ३० ॥ नन्वभीष्टप्रतिबंधकपापादेवताभीष्टासिद्धिरंतोमं
त्रजपमलिनभावात्तस्मिन्परिहृतेइष्टंसेत्स्यतीतिस्वाशयोमलिनेमयितवमंत्रजपोमालिन्यंकिमपिकरिष्यतीत्याशयेनाह ॥ मालिन्य
मिति ॥ मालिन्यंदोषाःभीत्यामलिनत्वभयेनभाषतेशोः ॥ मालिन्यंशमलंकिंवाकर्तुंनशक्नोदूरीकर्तुंस्वभावसिद्धंतुदूरीकर्तुंनशक्नो
तेतद्वन्मनःमत्संकल्पात्शरीरपापात्पापंशरीरादिसंपिपादयः पापंतवजपःकिंपृथक्कर्तुंनशक्नोतीतिभावः ॥ ३१ ॥ ॥ ॥ ॥

ननुतंदोषान्वरसिकिमित्याचरसितत्रेदानींपापिष्ठःपापंनकर्तव्यंदृतिलोकसभक्षंवदन्करोतिएवेतिसदृष्टांतमाह॥कुर्विति॥कुरुमासाहसमित्यंसाहसंनकर्तव्यंदृतिजल्पंनूवदन्पक्षीपक्षिविशेषः स्वयंपाषाणंभिनत्त्येवविदारयत्येव॥जातिस्वभावत्वात्॥तद्वहमपिपापंकुर्वितमितिवदामिकरोमिचैवंदुष्टस्वभावत्वात्॥३२॥ननुयथाचंदनतरुसंसर्गेअचंदनोपितरुश्चंदनीभवतितथामन्त्रंत्रजपादिनामसंसर्गेदोषःनस्यादेवेतिचेत्स्वभावसिद्धदोषाअपरिहरणीयाःप्रयत्नशतैरित्याह॥मृगमदभूमोजनितेति॥मृगमदभूमोजनितःकस्तूरिकालबालेसमुत्पन्नःपलांडुःदुर्गंधिकंदविशेषः॥स्वकीयंदोषंदौर्गंध्यलक्षणंनजहातीत्यर्थः॥हे

माकुरुसाहसमित्थंनल्यपक्षीभिननिपाषाणं॥तद्वत्साहसैर्दोषैःपापंनिरामिरामकुर्वेचं॥३२॥मृगमद्
भूमोजनितोजहातिदोषंनिजंपलांडुः किं॥तद्वत्तवरासोहंत्यजामिदोषंनजातुदेवेश॥३३॥स्फुरति
नरेषत्यपिप्रायश्चित्तंरघूत्तमप्रोक्तं॥अपयातिमामुरीक्ष्यप्रायस्त्वदपीहगौरिवव्याघ्रं॥३४॥ ॥

देवेशरामभद्रतद्वत्तवरासोजातुकदाचिदपिस्वकीयंदोषंनत्यजामि॥जातिस्वभावत्वादित्यर्थः॥३३॥इदानीमत्यंतपापिष्ठश्चेतर्हिप्रायश्चित्तादिनातवशुद्धिर्भविष्यतितिततदपिमयिनसंभवतीत्याह॥स्फुरतीनइति॥स्फुरतीनःबहुपुण्यवतःपुरुषस्येषत्सापसमुत्पन्नेतत्परिहारार्थंराघवप्रायश्चित्तंप्रोक्तंविहितंशास्त्रेणेत्यर्थः॥हेरघूत्तमतदपिप्रायश्चित्तमपिमामुरीक्ष्यालोक्यापयाति दूरतःप्रयातिशुद्धिकार्यंनकरोतिमदीयपापस्यमहत्त्वादित्यर्थः॥यथाव्याघ्रंदृष्ट्वागौरिवगौर्यथादूरंपलायतितद्वदित्यर्थः॥ ८
॥३४॥

ननुपापसमसंख्याकंप्रायश्चित्तंविधेयंततःसर्वेषांपापक्षयेसतिकृतार्थस्याःइतिचेन्मत्पापसंख्येवनावगम्यतइत्याह॥परिगणनेतिभगणनांनक्षत्राणांनभसमृक्षंतरेरयमरः॥परिगणनासंख्याथचपरमाणूनांसमंततः सर्वेषांगणनाभविताभविष्यतिश्रीराघवपरंतुमत्कृतानांपापचयानांपापसमूहानामियताकेनकेनापिनभवेत्तेषामपरिमितत्वादितिभावः॥३५॥इदानींरामचंद्रंदृष्ट्वातिसर्वज्ञेति॥हेरामतेतवसर्वज्ञतांश्रुत्वासर्वज्ञतांलंघयःसर्वज्ञःसर्वैरितिश्रुतिषुस्मृतिषुपिश्रुतमनोसत्यंवदाहंनवकिंकरोस्मिसेवकोस्मीतिच

परिगणनाभगणनांभविताद्रिवासमंततोणूनां॥राघवपापचयानांनमस्कृतानांभवेदियंकेन॥३५॥
सर्वज्ञतांश्रुतांतेसत्यंवदरामकिंकरोहंते॥मत्कृतदुष्कृतसंख्यांयथार्थतोवेत्सिकिंनवावेत्सि॥३६॥
अपराधिनमपराधिनमपराधिनमर्भकंरघूत्तंस॥पालयपालयपालयजननीश्रीरामनाथयेकिंचित्॥३७॥

रणात्सत्यंवक्तव्यंसर्वज्ञत्वान्मत्कृतदुष्कृतानांसंख्यांयथार्थतोवेत्सिकिंवावनेत्सीतिसत्यंतयावक्तव्यमित्यर्थः॥३६॥इदानींकिंबहुप्रार्थनयास्वामिभिःसर्वथापालनीयएवाहमितिप्रार्थयति॥अपराधिनमिति॥हेरघूत्तंसरघुकुलभूषणअपराधिनमपराधिनमितिसंभ्रमेणप्रवृत्तौयेथेष्टप्रयोगोन्यायसिद्धः॥इतिवचनात्संभ्रमेपराधिनमित्यनेकधाप्रयोगइतिबोध्यंयथासर्पःसर्पसर्पेत्यर्थापराधीनमर्भकंबालंपालयेत्यत्रापिपूर्वसंभ्रमेणेजननीश्रीरामान्यत्किंचिन्नार्थयेनप्रार्थयामि अत्रजनकस्थानेजननीपरंसंतवात्सल्योद्योतनार्थं॥३७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदानीमहमनाथइतिसनाथइतिवाक्यंनशक्नोमि त्याशयेनाह॥उचितमिति॥हेरामाहंत्वयिनाथेसतित्स्वामिनिविद्यमानेनाथइतिवाक्यंवचनं॥
वक्तुंवदितमुचितमितियोग्यंनहियोग्यंनभवतिअभद्रमंगलत्वात्॥हेसीतानाथत्वयोपेक्षितोहमितिहेत्वासनाथइत्यपिवक्तुंवादितमुचितं
मितियोग्यंनाहियोग्यंनभवतिअभद्रं निःस्नेहमिलज्जायुक्तोभवाम्युभयथापिवक्तुमसमर्थइत्यर्थः॥३८॥इदानींगवादिपशुरपिक्रोशंतंस्ववत्सं
प्रतिवात्सल्येनशीघ्रंसमुपयातित्याशयेनाह॥क्रोशंतमिति॥क्रोशंतंदीर्घस्वनंकुर्वंतंदीनास्यंम्लानवदनंनिजंस्वीयंवत्संप्रतिपशुरपिपशुर्यो
निरपिगोर्यवादिः॥समुपयातिसमीपमुपसर्पतिहेरामममदीयंत्वीदृग्भाग्यंयस्सर्वविदपिभवान्मत्रूपांमयिकरुणांकर्तुंनवक्तुंनवेतिन

उचितंवक्तुंमभद्रंनहिनाथेत्वय्यनाथइतिवाक्यं॥निःस्नेह्मुपेक्षितोहंसीतानाथत्वयासनाथइति॥३८॥
क्रोशंतंदीनास्यंपशुरप्युपयातिगोर्निजंवत्सं॥ईदृङ्मदीयभाग्यंसर्वविदपिवेत्तिमत्रूपांनभवान्॥३९॥
सर्वज्ञःसाधिनोदयालुरभिधेहिमयिकथंकठिनः॥इतिपृष्टोदास्यसिकिंविनेश्वरंमामोत्तरंराम॥४०॥

जानाति॥३९॥इदानींसर्वज्ञत्वादिगुणसंपन्नोपिभवान्मयिकिमितिकाठिन्यंकरोषीतिप्रश्नेकिमुत्तरंतवेदित्याशयेनाह।सर्वज्ञइति॥स
र्वज्ञःसर्ववेत्तास्वाधीनोपरतंत्रदयालुःकृपासिंधुरेवंभूतोपिभवान्मयिकथंकठिनोकृपावानित्यभिधेहिवदइतिमयालंपृष्टश्चेद्रामेश्व
रत्वंनिनाममोत्तरंप्रत्युत्तरंकिंदास्यसिईश्वरोहंस्वेछाचारीकस्योपरिकृपांकरोमिकस्यचिदुपरिनकरोमीतीश्वराणांप्रभूणांस्वभा
वएवैषमस्त्वेछाचारीत्वमितिभावः॥४०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ९

ननुअपराधिनोमयाकृपानक्रियतइतिचेन्नवयंतोभक्तास्तेपिसर्वसंसारिणएवसंसारिणंतनश्यमपराधोभवत्येवैवंसतिकस्याप्यपरिकृपा
नोचितेत्याशयेनाह॥अपराधेति॥अपराधमार्गणेप्यपराधपरामर्शनेसाकचिदपिकस्मिंनपिसंसारिणिभक्तेपिनवकरुणानैवोचितासं
सारित्वादित्यर्थः॥यतोनहिकश्चित्संसारिगतापराधोनामाकृतापराधःननुवल्लभेष्वपिकृपापात्रेष्वप्यस्तिकोपिनास्तिसंसारित्वादिति
भावः॥४१॥ननुयदुपरिकृपाक्रियतेतस्यतुस्वल्पोपराधःनवनुबहवोपराधाइतिहेतोस्त्वयिकृपान्नविधीयतइत्याशयेनाह॥तस्येति॥
तस्यतत्कृपायुक्तस्यस्वल्पोपराधोममपुनरधिकउत्कृष्टइतीत्थंप्रमाताकःकानोसाक्षीनकोपीत्यर्थः॥ननुत्वमेवंवक्तव्यंअहमेवसाक्षी

अपराधमार्गणेपिकचिदपिकरुणातवोचितानैव॥नहिकश्चित्संसारीगतापराधोस्तिवल्लभेषुतव॥४१॥
तस्यस्वल्पोपराधोममपुनरधिकइतिप्रमाताकः॥आहमितिचेदभ्यस्तास्तवयेशसर्वज्ञतैतदर्थेकिं॥४२॥
अग्रजजायामिछत्यग्रजवधलालसंतरात्मनिच॥याकरुणास्त्रीवेराघवसातेकथंतरामुचिता॥४३॥

तिसर्वज्ञत्वादिति चेदीशंभोरामचंद्रतर्हित्वयैवस्वेनैवतदर्थेकिंस्वस्यसर्वज्ञताभ्यस्तापुनःपुनरुक्तेत्यर्थः॥४२॥ननुसापराधेषुममदया
कुत्रत्वयादृष्टेतिस्वामिभिर्नकर्त्तव्यंचेत्सापराधेष्वपिअनुग्रहोदृष्टइत्याशयेनाह॥अग्रजजायामिति॥अग्रजयांज्येष्ठ।भ्रातरिस्त्रियमिछ
तिवांछतिस्मग्रिंवकिंलक्षणेपुनरग्रजवधलालसांतरात्मन्यग्रजेवधेवालिवलेधेलालसोलुब्धोंतरात्मायुधिर्यस्येत्येवंभूतेनिषिद्धकर्मकारिण्य
पिस्त्रीवेराघवसातेप्रसिद्धाकरुणाकथंतरामतिशयेनोचितोअतिशयेनरुणंतस्तावयास्तापराधेष्वप्यनुग्रहःक्रियतइतिभावः॥४३॥

पुनरुपिसापराधानुग्रहंदर्शयति॥भ्रातरवज्ञामात्राद्भ्रातुरावणस्यावज्ञामात्रादपमानमात्रात्पितृवैरवन्हिनेवपितृवैरमेववन्हिस्नेनेवजनवा
वेगात्सितृवैरंतुवन्हिरूपंदुःसहत्वादित्यर्थः॥अपमानाश्चेतोःसत्रेतिपरमव्ययंसहार्थकंकरात्किञ्जातुसार्धंतुसाकंसत्रासंसहे
त्यमरः॥पितृवैरवन्हिनासहेतियोज्यंज्येष्ठभ्रातापितुःसमःपित्रारावणेनसाकंयद्वैरंतद्देववन्हिस्नेनपितृवैरवन्हिना

भ्रातुरवज्ञामात्रात्स्वत्रापितृवैरवन्हिनेवजवात्॥स्वस
मीपमागतेस्मिन्विभीषणेकास्तिनिरपराधत्वं॥५४॥

साकमेवस्वसमीपमागनेशरणागतत्वेनप्राप्तेस्मिन्विभीषणेरूपारुतानस्मिन्कास्तिनिरपराधत्वंनिर्दोषित्वंकुत्रास्तिनास्तीत्व
र्थः॥५४॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

१०

इदानींकेवलावज्ञात्परदोषाविष्करणंमयाकृतमितिमयिनिंदकत्वंनारोपणीयमित्याह॥जल्पतीति॥यत्किंचिदुच्चैर्जल्पतिप्रलापंकुर्वतिमयिपौ
रोभाग्यं दोषैकदृक्पुरोभागीत्यमरः दोषैकग्राहिहृदयःपुरोभागीतिकथ्यतेऽतिकात्याच पुरःअग्रेयथमंपरदोषमेवभजतेसपुरोभागि
तस्यपुरोभागिनोभावः पौरोभाग्यंपरदोषैकदर्शित्वमितियावत् भावेष्य--तश्चिलःश्रेष्ठत्वंव्यंजनकंनिंदकत्वंमाकल्पयहेसमा
सिंधोसहनसमुद्रेतिसहेतुकंविद्वेषणं तर्हित्वंकुतएवैतित्वल्पसीतित्वयोवाच्यमित्याशयेनाह संतसचित्तभावादिति हेउत्तमश्लो

जल्पतिकल्पयमोच्चैःपौरोभाग्यंमयिक्षमासिंधो संतसचित्तभावादुरुक्रमुकंयदुत्तमश्लोक ५५

कस्पृहणीयकीर्तेसतसचित्तभावादुरितनचित्तत्वायदुक्रंअसाधूक्रयःसंतसचित्तोभवतिसनुसाध्वसाधुपरत्वेनेतियद्वाहेक्षमा
सिंधोहेउत्तमश्लोक्यतेसतथायद्वाउक्रंतनमोयस्मात्सउत्तमः अज्ञानविवर्तकःश्लोकः कीर्तिर्यस्यसतथापठ्येयशसिचश्लोक
इत्यमरः सतसचित्तभावादितिहेतुपंचमीसंतसचित्तहेतुकंयत्सूर्नोक्रपरदोषकीर्तनरूपंतदुच्चैर्जल्पतिमयिपौरोभाग्यंइतिमा
कल्पयेत्यन्वयः ५५ ७ ७ ७ ७ ७ ७

इदानींपरदोषोद्घाटनेनस्वस्मिंनिंदकलंसमायातीतिस्मारित्याशंक्याह आस्तामिति आस्तांतिष्ठतुपरोक्षेसमक्षे परदोषगवेषणं परदोषोद्घाटनमसभ्यंनिंद्यमतोनकर्तव्यमितिअर्थः ईदृशीभवतश्चरितेयोग्येपिरुपाकरणरूपेसतिविभीषणाद्यैःममकिम पराधंकोवापराधःतोयन्मयादोषोत्घटनंकर्तव्यमितिभावः ४६ इदानींभवानिवस्वेछाचारीत्यतोन्यदोषारोपणेनमित्याह

आस्तामेतत्सभ्यंपरदोषगवेषणंपरोक्षेयत् ईदृशिभवतश्चरितेविभीषणाद्यैस्तुकिमपराधंमे ४६
स्वीयमाणोगुणहीनेकोवाकलहःपरिक्षकेणसह त्वयियदछिकृत्यैभृत्येनसहेर्ष्यायाभवेत्किंमे ४७

स्वीयमाणाविति स्वीयमाणोगुणहीनेस्वकीयोयोमणिः तस्मिंगुणहीनेलक्षणरहितेसतिमणिपरीक्षकेणसाकं कलहोविवादः कोना नकोपिस्यर्थः तद्वत्वयिस्वामिनिप्रभोयादछिकृतोस्वेछाचारिणिसतिभृत्येनसेवकेनसहसाकमीर्ष्यायाउत्कर्षासहनेनविपा देनममकिंवायिप्रयोजनंनास्तीत्यर्थः ४७

इदानींयन्ममनसिस्थितंनयादुक्तंसाध्वसाधुतत्सर्वंक्षंतव्यमित्याशयेनाह त्यक्त्वमिति हेरामभैवंममनसिस्थितंतत्सर्वंयच्चया वत् तवाग्रतःत्वत्समीपेउक्तमेवसत्यपियद्यप्यधुनापिरुष्टःसक्रोधस्तर्हिनात्रित्यनुनयमंत्रणेप्रभानधारणानुज्ञातयेमं त्रेणेननुइत्यमरः ननुरामप्रसीदतवपादयोश्चरणकमलयोरुपरिपतितोस्मिसाष्टांगनतोस्मिपादयोःशरणतत्वेननम स्कारक्रिययासर्वेपराधाःक्षंतव्याइतिभावः ४८

त्यक्त्वमेवउक्तंतवाग्रतोरामयच्चयानच्च यद्यप्यसिरुष्टःस्तन्ननुपतितोस्मिपादयोरुपरि ४८
प्रणिपातमात्रनीरङ्घाम्यतिकोपभुभुक्षणिर्महतां ममदुरितस्यविपाकैराघवनाद्यापिमुक्तकोपोसि ४९

इदानींसतांस्वभावएवैषयत्प्रणामेरुतेपराधिन्यपिप्रसन्नतेत्याशयेनाह प्रणिपातमात्रनिरादिति हेरामचंद्रप्रणिपातमात्रनीय प्रणिपातएवप्रणिपात्रमात्रंतद्देवनीरंतेनमहतांसाधूनांकोपभुभुंक्षणिः क्रोधाग्निःशाम्यत्कपामयातिभोराघवममदुरित विपाकैःपापपरिपाकैःलंत्वयापिदानीमपिमुक्तकोपस्त्यक्तक्रोधोमद्विषयेनासिनभवसीत्यर्थः ४९

इदानींसर्वथात्वयाहमनुग्राह्यएवइत्याह त्वत्तुल्यइति त्वत्तुल्योनास्तिविभुस्त्वसदृशोविभुःस्वामिनास्तिभुवनत्रयेपिसतुल्योदीनो
पिनास्तिहेदीनानाथैकबंधोदीनाश्चअनाथाश्चतेषामेकोमुख्योयबंधुस्तत्संबोधनंदीनानाथैकबंधो एकेमुख्यान्यकेवलाइत्यम
रः एकः केवलमुख्ययोरितिविश्वश्चकरुणासिंधोदयासागराहमन्यत्किंवक्तव्यमित्यर्थः ५०

त्वत्तुल्योनास्तिविभुर्मत्तुल्योनास्तिचापरोदीनः दीनानाथैकबंधोकरुणासिंधोब्रुवेहमन्यत्किं ५०

दैवैं त्वयिस्वयंप्रकाशेत्रिभुवनभवनंत्वयिप्रकाशयति करुणांपश्यामिनोचेद्धोगहंनसास्तिगाभवति ५१

इदानींसर्वप्रकाशकःस्वप्रकाशश्चेन्मयिकुतोकरुणारूपःप्रकाशोनदृश्यतइत्याशयेनाह त्वयीति त्वयिस्वयंप्रकाशेस्वप्रभोत्रिभुवन
भवनंत्रिभुवनमेवभवनंगृहंभवनागारमंदिरमित्यामरः तत्प्रकाशयतिसतिकरुणालक्षणंप्रकाशमहंनपश्यामि तत्किंधोवा
वातिमिरोपहतनेत्रोयास्मिनाथनासाकरुणाभवतित्वयीनास्तीतिमयिसंदेहइत्यर्थः ५२

इदानींमज्जल्पितेनसाध्वसाधुनातवमनसिविषादेसतिमयाभीष्टमिक्षितंकरुणापांगवीक्षणंनकरोषीत्याशयेनाह नाभीष्टमि
ति हेरामयदिकरुणातःकरुणयासार्वविभोत्किंकस्मिन्मामाभीष्टमभिलषितंनकरोषिकिंभूतस्यमेसापराधस्यापराधवतः
तस्मान्मज्जल्पितेनममदुर्वचनेनहेतुनास्वांतोद्वेगेनमनसःक्षोभेनवाकिमर्थंनकुरुषेनकरोषीत्यर्थः ५२ इदानींक्लेशवैरिणोपि

नाभीष्टंकरुणातःकरोषियदिरामसापराधस्य मज्जल्पकल्पितेनस्वांतोद्वेगेनकिंनवाकुरुषे ५२
अरयोपिवैरभावादिष्टंभवतोलभंतएवयस्य रासस्यमेदयालोःप्रार्थितदानेकथंसुरासीनः ५३ ॥

परमांगतिंप्राप्ताः महिषयेकिंमिसुरासीनइत्याशयेनाह अरयोपिति अरयस्तवयेपिवैरिणोपिवैरभावाद्वैरभावाद्रपिद्वेषमुत्तमपदप्रा
प्तिलक्षणंभवतः श्रीरामचंद्रालभंतएवप्राप्नुवंत्येव आशुशीघ्रमेवहेदयालोरुपासमुद्रासस्यमेभिलषितदानेकथमुदासीनोसीत्करु
णांनत्वेकिंकारणमितिनजानामीतिभावः ५३

ननुनारत्नमुपनिष्ठतीतिन्यायेनकिंचिद्दत्तेनविनाकस्यापिकिंचिन्नदीयतेमयेत्याशयेनाह नारत्नमिति नारत्नंरत्नेचेदंरत्नंदत्तामीतिवदस्मि
न्चेनर्हिविभीषणेनरावणभ्रातापुरीनगरीपुराकस्मैपात्रभूतायरत्नापिचकिष्किंधाख्यनगराधिपत्यंकपिनाकृत्रीवेणभवांतरेजन्मांतरेक
स्मैदत्तंकुत्रापिपुराणादौनश्रुतंतस्मादरत्नमपिदत्तासीतिभावः ५४ इदानींयत्नुभयंदीयतेनदेवरीषासीतित्वयिकोपिनियमोनास्तीत्या
शंक्याह श्रीरामतः सकरामशर्मणेद्विजात्पृथुकाभक्षितंतंदुलनिरुतयोगृहीताः परिमितादिमुष्टिमात्रास्तवैवएवकिन्नोदत्तास्तस्मा
दधिकमपिदत्तासीत्यर्थः अधिकंदत्तमित्याशयेनाह ऐदृंपरमिंद्रपदसमानवैभवमिहास्मिन्नेवलोकेतस्मैसकराम्भेदत्तमर्पित

नारत्नंतत्सेचेत्सकस्मैदत्ताविभीषणेनपुरी किष्किंधाराज्यंवाकपिनादत्तंभवांतरेकस्मै ५४
श्रीरामतोगृहीताःपृथुकाश्चेत्किंतएवनोदत्ताः ऐदृंपरमिहतस्मैदत्तंतत्केनतस्यसकत्वेन ५५

तत्तस्यकिंनसत्वेनकेनसकृतपरिपाकेनतस्मादत्तस्यसदृशमेवदीयते अयंनियमोत्वयिनास्तीभावःअवतारांतरचरितमिदमत्यद्
बुद्धिमतांभेददृशांभातिभक्तानामेकदृशामभेददृष्टिनामेकमेवरामचरितंविनाविभातीति रुद्रावतारेपिजांबवदादीनांश्रीरामरूपेणै
दर्शनमादिकाव्यादिषुप्रसिद्धंमहामुद्गलभट्टादीनामपिलोकेप्रसिद्धरुद्रचरितमपीदंरामस्यैवरामरुद्रयोरभेदात् उक्तंचाभियुक्तैः न
नंदस्नोःपृथगस्तिरामोनरामतोवावसकृदेवसत्नुः तथाप्ययोध्यापुरपालंबालेसलुक्ष्मणेधावतिमेमनीषेति ५५

इदानींत्वयावेपरित्येनापिफलंप्रदीयतइत्याशंक्याह उन्मोचितइति उन्मोचितोगजेंद्रः ग्राहभक्षितोद्विपः किंभूतोगजेंद्रः मदांधदृष्टी।मदोन्मत्तः तिर्यगु
द्भूतिः पशुयोनिः रक्षितादृतिवेपरित्यमेकंअन्यच्चदातादानशूरःसेतीतकर्तव्यत्वमपित्वयितिष्ठतीतिभावः ५६।अन्यदपिविपरीतकर्तृत्वं
रावणादिषुदर्शयति।उद्भूतचित्तरत्नेर्दुश्चरितस्यपरदारहरणरत्नेर्दुश्चरितस्यपरदारहरणरत्नेर्दशास्यस्यरावणस्योत्तमलोकस्थि
तिर्वैकुंठप्राप्तिरन्यच्चदशरथसंज्ञस्यविभोर्धराधीशस्योच्चैस्तरांमहाबाधःपातः।कल्पितःइदमेकवेपरित्यंदशरथराज्ञोधः
पातोत्रममैवभातीतिअधःपातस्यकुत्राप्यश्रुतत्वात्त्वयोक्तत्वाद्दशरथसंज्ञस्यविभोरधःपातोनामस्वर्गनिष्ठयोः सकृदु

उन्मोचितोगजेंद्रोमदांधदृष्टिश्चनिर्यग्जूतिः।दातासेवकुलजःपातालेचत्वयाबलिर्बंधुः॥५६॥
उद्भूतचित्तरत्नेरुत्तमलोकेस्थितिर्दशास्य।दशरथसंज्ञस्यविभोकल्पितउच्चैस्तरामधःपातः॥५७॥

खाभिधानत्वाच्छ्रीमद्रामभद्रपुत्रानाप्यातिपरमसुखसर्गोपरिस्थितस्यविभोर्दशरथस्यराज्ञःदेहावसानसमयेवशेषप्रारब्धोपभो
गत्वादवश्यमेवभोग्यकर्मणोनुभाशुभं।।सुकृतकर्मक्षयोनास्तिकल्पकोटिशतैरपिइतिवचनात्।।प्रारब्धकर्मणांभोगादेव
क्षयइत्यपिवचनात्।।श्रीरामाभिषेकाभिधानायतिरथस्यश्रीरामेणाभिवंदनालिंगनेसतिशयसुखावाप्तिर्जातेति चोक्तमपिका
व्यादिषुयद्वाधःपातोनामकर्मजन्येस्वर्लोकेस्थितिरितिनात्रकापिशंकेर्यथः॥५७

DR BHAU DAJI LIBRARY

इदानींप्रयत्नमकुर्वतोरपिसमीहितंददासीत्याह॥सुग्रीवेति॥सुग्रीवविभीषणयोः प्रसिध्योरुभयोस्तूष्णींस्थितयोर्निर्व्यापारयोः परंउत्कृष्टं राज्यंततदेशाधिपत्यमभूज्जातंतयेनदत्तमित्यर्थः॥अन्यत्सर्वंकृत्स्नाभिषिक्तेसर्वंकृत्स्नसहनत्वसार्धमेवांभूतावायुनंदनेकपिपतौप्रसन्नतामौनंतूष्णींभावंतस्यकिमपिलोकीकपदार्थेषुनदत्तनित्यनास्त्यर्थस्तयदत्तंतन्नकस्यापित्यर्थः॥गुरोस्तुमौनंव्याख्यानंशिष्यस्तु

सुग्रीवविभीषणयोस्तूष्णींस्थितयोरभूत्परंराज्यं॥सर्वंकृत्स्नाभिषिक्तेप्रसंनतावायुनंदनेमौनं॥५८॥

यद्यत्करोषिचेतन्महेश्वरैस्तेनशोभतेभवतः॥आस्तांतंननुसकलंसकलंकमपीहपाहिमांराम॥५९॥

छिन्नसंशयाः॥५८॥इदानींकिंबहुक्तेनयद्यत्करोषितत्तत्सर्वंतव्युपपद्यतेयोततेईश्वरादित्यर्थः॥इदानींकिंबहुक्तेनयत्प्रार्थनीयंतदेवप्रार्थयितव्यंइत्याशंक्याह॥आस्तामिति॥ननुनिश्चयेनतत्सकलंसर्वंआस्तांभवदुणशेषकथनंतिष्ठतुसकलंकमपिसदोषमपिमांतत्सेवकंरामपाहिरक्षकृपापांगेनावलोकयेत्यर्थः॥५९॥ ॥ ॥ ॥ ॥ ॥ १४

नचरेत्वयायत्किंचिदपिकृत्यमहंतुतनाभीष्टंनदत्तमितिचेदिदानींमयाहमयतत्समीपतयाचेलांचलेदृतएवेत्याशयेनाह॥चेलांचलदितिहेरा मममयात्वंचेलाचलेदृतोसिनस्रपल्लवेगृहीतोसिमत्सकाशात्प्रसभंरुद्धलात्कारेणकुत्रान्यत्रस्वैरंस्वेछयाययास्यसिगछसि॥हेराम ममजीवनरतिंकुरुयोगक्षेमंवहयाज्ञथाराममेत्यलोकेषुजनेषुन्यवहारममाभीष्टदानविषयेवरंकुरुयथालोकेपित्रासहपुत्रादिविषये

चेलांचलेदृतोसिप्रसभंकुत्रापयास्यसिस्वैरं॥कुरुवाजीवनरतिंवरयास्यवहारमीदृग्लोकेषु॥६०॥

त्वंममजननीजनकस्त्वमेवबंधुःकुलंचशीलंच॥त्वयिनिष्ठुरतांयातेतृणमपिवज्रायतेमयीशान॥६१॥

वारःक्रियतेनदृढ़ित्यर्थः॥६०॥इदानींत्वमेवममसर्वमित्याशयेनाह॥त्वमेवेतिहेरामत्वंभवानेवममजननीमाताजनकः पितापित्वमेवबंधुःकुलंचशीलंचत्वमेवएवंचत्वयिस्वामिनिष्ठुरतांनिर्दयत्वंयातेप्राप्तेसतितृणमपिमयीशानस्वामिन्वज्रायतेवज्रवदाचरति कुलिशप्रायंभवतीत्यर्थः॥६१॥ ॥ ॥ ॥ ॥ ॥ ॥

इदानींत्वत्कृपाचेत्कालादिभ्योपिममभयंनास्तीत्याशयेनाह॥कृपयेति॥हेरामत्वंमांकृपयाद्रक्ष्यसिचेत्यदितरोचैःकालंमहांतंअपिकृतांतं तृणायनमन्येमन्यकर्मण्यनादरेविभाषाप्राणिषुग्रहनेनकर्मणिचचतुर्थीतृणायतृणंवाप्राणिवजेमन्यतेःकर्मणिचतुर्थीवास्यातिरस्कारेइतिसूत्रार्थःतृणसमानमपिनगणयामि भोरामकृपाचेत्तवककरुणयानावलोकितोयदितदातृणमेवकालरूपंप्रायोबहुशःममभविष्यति॥६२॥इदानींस्वामिनामग्रेबहुधार्ष्ट्यमनुचितमित्याशयेनाह॥अथवेतिअथवापक्षांतरेहोखेदेकिंब

कृपयाद्रक्ष्यसिमांचेत्तृणायमन्येनकालमप्युच्चैः॥अकृपाचेत्तवरामप्रायस्तृणमेवकालरूपंमे॥६२॥
अथवाहोकिंबहुनाधाष्ट्यंकिमिहोचितंप्रभोःपरतः॥जन्मप्रबंधसिद्धाआधीनांयांतिमूलतांदोषाः॥६३॥

बहुनावहुजल्पेनप्रभोःपरतःस्वाम्यग्रेधार्ष्ट्यधृष्टत्वंमिहास्मिन्विषयेकिमुचितुमित्यर्थः॥कुतोनोचित्तविक्षेपलक्षणानामूलता हेतुतायांतिप्राप्नुवंतिजन्मांतरकृतादोषांएवसुखदुःखहेतवइतिभावः॥६३॥

इदानींजन्मांतरेवावर्तमानजन्मनिवालवाराधनहीनस्यकथंस्वेष्टप्राप्तेरित्याशयेनाह॥नाराधितइति॥नाराधितेनसेवितःपूर्वेपूर्वजन्मनिक्वचिदपिकदापीदानींसांप्रतमपिनाराधयामिएकांतभक्त्यानभजामि॥अथस्वमिष्टंस्वकीयमभिलषितमिछामिवाटमत्यर्थंहाखेदेकष्टंसक्लेशंमूढतेवैषाममेति॥६४॥इदानींसकलदोषनिचयसंपन्नेमयिस्वीयमिष्टंसिद्धयतिमत्वाहपांकरोपिचेतवात्यंतक्षेमेत्याशयेनाह॥दुर्वृत्तमितिदुर्वृत्तंदुःशीलंदुर्बुद्धिंकुमतिंकामादिनशंकामक्रोधलोभमयंभवतिप

नाराधितोसिपूर्वंक्वचिदपिनाराधयामिचेदानीं॥रक्षामिचत्वमिष्टंहामूढतैवमेवाटं॥६४॥
दुर्बुद्धिंकामादिवशंपराङ्मुखंभवति॥पालयसिमांयदेवाराघवभवतःक्षमोच्चकैर्नयति॥६५॥
रचितापराधजालेमयिसदयोसीतिवेद्मनेनैव॥मुखतोनिरंकुशामेरामेतियतःप्रवर्ततेवाणी॥६६॥

पराङ्मुखंस्वामिनिविमुखमित्यादिदोषमित्यादिदोषगणयुक्तमेतादृशंमांहेराघवयदिपालयसितर्हिभवतःस्वामिनाउच्चकैःसर्वोत्तमासहनतेतिभावः॥६५॥इदानींतवदयैवर्तत इतिजानामिइत्याशयेनाह॥रचितापराधजाल इति॥रचितापराधजालेकृतापराधसमूहेमयिसेवकेत्वंसदयोसिकृपालुरसीत्यनेनैवहेतुनावेद्मिजानामिकेनहेतुनेत्याशयेनाह॥मुखइतिमेमुखतोममवदनान्निरंकुशाप्रतिबंधरहितारामेतिमुहुर्मुहुर्वाणीगद्यंवर्ततेनिस्मरतियतोयस्मात्कारणादतोजानामिनांकृपावर्ततइतिभावः॥

इदानीं वैपरित्यादपि कृपास्तीत्यनुमीयतइत्याशयेनाह । नैवेति ॥ यस्मिंस्तवानुकंपायस्मिन्पुरुषेतवकृपानास्तितस्यास्यपुरुषस्यमुखादुक्तात्कथंका
रंकथमित्थंप्रसरेद्वामेतिवाक्यंनिरामयंनिरोपंभन्यथैवंकथमित्थंकसिद्धाप्रयोगश्चेतिसूत्रेणकथमित्यपपदेरुतेणमुलमातेमव्ययमि
दंकिंभूतस्यपुरुषस्य ॥ किल्बिषमुद्राभाजः किल्बिषानांमुद्रालक्षणेभजनीतिभाक्नभाजः पापलक्षणालंकृत्यर्थः ॥ ६७ ॥ ननुत्व
कृपामप्यस्तिममदोषोद्भवान्केशान्निर्मूलान्किमितिनकरोषित्वयानोक्तात्रादितिचेदत्रपुनरपिस्वदोषाविष्कारमेवकरोति ॥ तृष्णाव्या
लविषातंतृष्णेनव्यालःसर्पःतस्यविषंतेनार्तंपीडितंअथचधन धनशब्दैरैत्य इत्येतिप्रलापितैरुर्व्यांपृथिव्यांपतंतंलुठंतमथचगुरु

नैवास्तितेनुकंपायस्मिंस्तस्यास्यतःकथंकारं ॥ किल्बिषमुद्राभाजोरामेतिनिरामयंवचःप्रसरेत् ॥ ६७ ॥
तृष्णाव्यालविषार्तंधनधनशब्दैःपतंतमुर्व्यांमां ॥ गरुडध्वजगुरुतापंजीवनदानेनपाहिरक्षोरे ॥ ६८ ॥ ॥

तापमत्यंतसंतप्तंमांहेगरुडध्वजरामचंद्रजीवनदानेनयोगक्षेमदानेनापुरुषपालयमांपाहीत्यत्रहेरामत्वयैवनकृत्यंयस्येदृशमस्तिसा
मर्थ्यसंप्रार्थनीयइतिचेत्तनध्वजोपरिस्थितस्यांउपर्यस्याप्यस्तिसामर्थ्यंतस्येशस्यतवास्तीतिकिंवक्तव्यमतोगरुडध्वजेतितृष्णा
व्यालविषापाकरणेनपाहिधनाशोपमर्दनेनरक्षस्वचरणस्थजीवनदानेनतापापहत्याच्चगरुडध्वजेतिसंबोधनेनैवसामर्थ्ययोति
तमचेतनेनगरुडमणिनालोकेविषाहरणंकर्तव्यमित्यर्थः ॥ यथाअत्यंतसंतापितःपृथिव्यांमूर्छितःपतितःपुरुषोदयालुनाकेनापिस
त्पुरुषेणजीवनदानादिभिर्जीव्यतेतद्वदित्यर्थः ॥ ६८ ॥ ॥ ॥ ॥ ॥ ॥ ३५

पुनरपिप्रार्थयति ॥ तृष्णानिंदाघतप्तमिति ॥ तृष्णानिंदाघतप्तंतृष्णैवनिंदाघउष्णोपगमःतेनतप्तंबहुसंतापितमतएवमुष्यत्कंशोषगलंनिराश्रयं
रक्षितृरहितमनएवदीनमेवंभूतंमांकरुणाकटाक्षरक्षछायाकरुणाकटाक्षएवरक्षःतस्यछायेनछायातामछांमतिस्वछांशीतलामित्यर्थः ॥
विधायकृत्वामांपाहिरक्षय ॥ ६९ ॥ पुनरपिप्रकारांतरेणप्रार्थयति ॥ तृष्णाकल्लोलनदीविशालकल्लोलसंकुलीभूतमिति ॥ तृष्णैव क

तृष्णानिदाघतप्तंशुष्यत्कंठंनिराश्रयंदीनं ॥ करुणाकटाक्षरक्षछायामछांविधायमांपाहि ॥ ६९ ॥ तृष्णाव
ल्लोलनदीविशालकल्लोलसंकुलीभूतं ॥ करुणापांगनिरीक्षितगुणजालैःकर्षमांप्रकर्षेण ॥ ७० ॥

ल्लोलवतीमहानदीतस्याविशालामहानोयेकल्लोलाः ॥ भंगस्तरंगऊर्मिर्वाल्लियांविचिरथोर्मिषु ॥ महत्सूल्लोलकल्लोलोऽस्यमरः ॥ महातृ
ष्णैवक्लेदसंकुलीभूतंव्याकुलितमेवंभूतंमांरामभद्रस्वकीयकरुणापांगनिरीक्षितगुणजालैःकृपाकटाक्षैःयानिरीक्षितानितान्येवगुणजा
लानिरज्जुसमूहास्तैःप्रकर्षेणबलेनमांकर्षाकर्षयेत्यर्थः ॥ ७० ॥ ॥ ॥ ॥ ॥ ॥

पुनरपिस्वस्यांत्यंतव्याकुलीतत्वप्रगटीकरणेनप्रार्थयते॥तृष्णानक्रविरूष्टमितितृष्णेवनक्रोकुंभीरःनक्रःकुंभीरापरपर्यायोयाद्रोविशेषः न तुमत्स्यविशेषस्तेघृणानात्राहोवसयोनक्रस्तुकुंभीरोथमहीतलेत्यमरः॥तेनविरूष्टंकर्षितमतएवंग्रासंचिरायबहुकालंदेवेशसीतापतेकरुणार्द्रीचित्त।इत्तेसदयमनोदत्तेप्रीत्यांत्यतवात्सल्येनगजेंद्रमिवमांसमुद्धरणाशतानिकाशयेत्यर्थः॥७१॥पुनरपिप्रकारांतरेण

तृष्णानक्रविरूष्टंकष्टंग्रासंचिरायदेवेश॥करुणार्द्रीचित्तदत्तेगजेंद्रमिवमांसमुद्धरप्रीत्या॥७१॥
तृष्णास्फकेतुकन्याभीतंत्वांरामशरणमापन्नं॥विश्वमित्रमिवोच्चैर्विश्वार्तिविनाशनात्रुमांपाहि॥७२॥

नरति॥तृष्णास्फकेतुकन्याभीतमिति॥तृष्णैवस्फकेतुकन्याताडिकानामराक्षसीतस्याःसकाशाद्भीतंत्रस्तमतएवत्वांशरणमापन्नंशरणागतत्वेनप्राप्तमांसेवकंविश्वामित्रमिवविश्वामित्रऋषिवत्॥उच्चैर्विश्वार्तिविनाशजगतः सर्वपीडाशमकात्रुमांपाहिशीघ्ररक्षविलंबंमाकुरु॥७२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १७

पुनरपिदयोत्पादकवचनैःप्रार्थयते॥तृष्णास्फबाहुमुख्यक्षपाचरव्रातविघ्नितमिति॥तृष्णेवस्फबाहुमुख्यक्षपाचरव्रातविघ्नितंस्फबाहुर्मुख्यःप्रधानंयेषांएतादृशायक्षपाचरारक्षसास्तेषांशतःसमूहःतेनविधितमुपद्रुतमेतादृशमांहेवीरविघ्ननिवारणक्षमरामगाधिजमुनिमखमिवगाधिजमुनिः॥विश्वामित्रऋषिस्तस्यमखोयत्तस्मिवरक्षपक्षणेरक्षतीतिरक्षः॥तत्संबुद्धिःहेरक्षरक्षणसमर्थरक्षकेतिपाठेयमेवार्थः॥रक्षोरेराक्षसशत्रोहेजानकीजानेसीतापतेपुनरपिप्रार्थनांकरोति॥हेरामअहल्योद्धारणेनतवहिमहामाहात्म्योजातस्तर्हिमत्तनुशल्यमहल्योद्धारणेनानंदंसपादयेत्याह॥पाषाणतामितिपाषाणत्वंशिलात्वंप्रपातंप्राप्तंमुनिशापेनैव

तृष्णास्फबाहुमुख्यक्षपाचरव्रातविघ्नितंवीर॥गाधिजमुनिमखमिवमांरक्षोरेरक्षजानकीजाने॥७३॥
पाषाणतांप्रयातंमुनिशापेनैवपूर्वपापेन॥मत्तनुशल्यमहल्यातुल्यतयाकल्यरचयकल्याणं॥७४॥

वगौतमशापेनैवपूर्वपापेनजन्मांतरपातकेनममतनुशल्यंतनुशल्यमहल्यातुल्यतयातुल्यंपापाचरणत्वेनजडत्वेनरचयकल्याणादोषश्चाकल्योरुभरणसमर्थरामचंद्रकल्याणंकुशलंस्फचैतन्यरूपंयथाभवतितथारचयसंपादयायमभिप्रायः॥यथाचरणोपस्पर्शेनाहल्योद्धरणंतथाममतनुशल्यस्यापिचरणस्पर्शनेनोद्धरणंकुरु॥उक्तंचाभियुक्तैः॥अहल्यापाषाणःप्रकृतिपशुरेवाकृपिचमूर्तेहश्चांडालोसौसमभवदहीपत्निपुरुषा॥अहंचित्तेनाक्षविषयविषभोगैरपिपशुःश्वपाकश्चेशामिरघुवरकथंनोधरसिमां॥नाकस्मिंगुरुजनैरूपरिष्टधर्मंयेनप्रसीदति॥भवान्प्रणतार्तिहारी॥हाधिग्मामतितरतांशिवधर्मसंगेत्याणिग्रहोत्सवजुषःकनुधर्मचिंतेति॥

इदानींनिजंपापंपशुपतिधनुरूपालंकारणवर्तयन्खंडनंतयरूपकरमित्याह ॥अधिगताःकोटियुगंतायेनतत्अनेकयुगार्जितमिति यावत्नश्लोबधोगुणस्त्रमोरूपोयस्यतत्धनुरपिप्राप्तायभागद्वहांतंसज्जंचहेअंडजमंडनवाहनगरुडवाहनचंडीशचापदंडमिव शिवधनुरियखंडयभंजय ॥७५॥पुनरपीप्रकारांतरेणस्तौति॥ननुकुंठितगतौतवमहान्हर्षस्तर्हिकुंठितगतिमेवकुरुतत्राह॥

अधिगतकोटियुगांतनश्लथगुणंरामशापमस्माकं ॥अंडजमंडनवाहनखंडयचंडीशचापदंडमिव॥७५॥
निर्भूमीरुतभूतलमर्जुनयशसोंतकंसकंपस्य॥कुरुदैन्यमेलकंमेकुंठितगतिमीशजामरण्यमिव॥७६॥

रामिर्भूमीरुतभूतलमिति॥निर्भूमीरुतंनिराजकंरुतंभूतलंक्ष्मातलमेतावताप्यर्जुनयशसःसहस्रार्जुनकीर्तेरंतकंनाशकमेतादृशंजा मदग्न्यमिवपर्शुराममिवसकंपस्यसत्रासस्यकंपितशरीरस्यमेममदैन्यमेलकंदरिद्रकलापंकुंठितगतिमकार्यक्षमंकुरुसंपादयईश दैन्यनिराकरणसमर्थइत्यर्थः॥७६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १८

पुनरपिप्रकारांतरेणप्रार्थनांकरोति॥हेरामयरिननप्रवेशेतिहर्षस्तवतर्हिमममानसवनप्रवेशमेवकुरुतत्राह॥ मृगजलबुध्निसमृध्नमिति॥ मृगजलबुध्निसमृध्नंमृगजलबुध्निवद्यावुधिः अन्यथाभावरूपातयासमृध्न्यासंनिराघेनोछोपगमेननसंसंतापितंमेरुणाकवर्णाद्रिणापिनपू र्णंपदाननविशेषणंतदानमेरुस्तूणविशेषस्तेनपूर्ण्यासमेतादृशंवनमिवममानसंहेरघूत्तंसरघुकुलभूषणहेसप्रियावरजप्रिया चअवरजश्चप्रियावरजोसीतालक्ष्मणेताभ्यांसहितयुक्तप्रविशास्मप्रविष्टस्यैवप्रवेशप्रार्थनानघटतेतथाप्यावरणभंगद्वारा

मृगजलबुध्निसमृध्ननिधौराघवसंनमेरुणापूर्णं॥वनमिवमानसमुच्चैःप्रविशरघुत्तंसप्रियावरज॥७७॥
आपरिमांस्मरतीतिप्रायोनकरोषिसंपदंममचेत्॥स्मृत्यामदीययातेभविताकिमिहाधिकंरघूत्तंस॥७८॥

विर्भवेत्यर्थः॥७७॥इदानींतवरुपालुवर्नतेतथादारिद्र्यमपिवर्तते॥दरिद्रिणोभक्ताःप्रमादिनोनभवंतीत्यतएवत्वयोक्तंयस्यानुग्रह मिछामितस्यवित्तंहराम्यहमित्यभिप्रायेणसंपदंनददासीत्याशयेनाह॥आपरीति आपरिविपत्तीकालेमांसर्वैश्वरंस्मरतिरहि दुःप्रायःबहुधातेनैवाभिप्रायेणसंपदंनत्वंदासीकरोषीमांसंपत्तीयुक्तंनकरोषीतितवमनस्ययमभिप्रायःचेत्मदीययामत्कृतयास्तु त्याहेरघूत्तंसकिमधिकंभविताकिंभविष्यतिनकिमपित्यर्थः॥७८॥ ॥ ॥ ॥ ॥ ॥

मम

इदानींदयास्वभावस्यतेभजनादिनिरपेक्षमेवसर्वत्रदयाकरणमुचितमित्यभिप्रायेणाह॥अपनयदैन्यमिति अपनयदैन्य
मिति अपनयदैन्यमुद्यंदैन्यहारिन्यलक्षणमपनयापहरअपरंचिंतासमग्रंसमस्तचिंतासमुदायंमेममपरिहरदुरीकुरुअन्यः कश्चिन्न
मदारिन्यमपाकरिष्यतीत्याशयेनाह॥त्वन्मुखवीक्षाभिन्नंरमतेनमुखंतस्यवीक्षांसादरमवलोकनंतभिन्नंतद्विहायान्यद्यत्नंनकरोमि
कर्हिचित्करावरिपिहेरामतवश्रीमुखारविंदावलोकनान्ममान्यःप्रयत्नोनास्तीतिभावः॥७९॥इदानींममव्यथांनिराकुरुषे

अपनयदैन्यमुद्यंपरिहरचिंतांचयंसमग्रंमे॥त्वन्मुखवीक्षाभिन्नंयत्नंनकरोमिकर्हिचिद्राम॥७९॥ ॥॥
ममनाशयाधिंवाधिंक्षमस्वविविधापराधसंबंधं॥शरणागतवत्सलइतिराघवशरणागतोस्मितेदास॥८०॥

स्याशयेनाह॥ममेति॥ममदीयमाधिंवाधिंआधिरेवव्याधिः मानसीव्यथासएवसमुद्रंनाशयदूरिकुरुविविधापराधसं
बंधंनाम्नाप्रकारायेपराधाअविनयास्तेषांसंबंधंतत्कृतविक्षेपंक्षमस्वहेशरणागतजनवत्सलाशरणप्राप्तानांजनानांवत्सलत्व
माकरराघवाहंतेनवशरणागतोस्मिशरणंप्रपन्नोस्मिशरणंप्रपन्नोस्मिदासोस्मिच॥८०॥ ॥ ॥ ॥ १९

ननुत्वयोक्तंसर्वंमयासंपाद्यंतवतुचित्तमतिचपलंमय्यनिष्ठतिसातिकिंकर्तव्यंमयेत्यतइदानींस्वकीयमनसःप्रार्थनांकरोति॥दश
शातकरवंशभवेरति दशशतकरवंशभवेसहस्रकिरणकुलोत्पन्नेदशरथपृथ्वीशपूर्वपुण्योद्योदशरथराज्ञःजन्मांतरपुण्यराशि
रूपेथचदशवदनांतकरूपेरावणमृत्युरूपेराघवभूपेरामचंद्रनृपनर्यैहेचेतःमनश्चिरमास्वचिरकालंनिष्ठंतंविहायान्यत्रमागछे

दशशतकरवंशभवेदशरथपृथ्वीशपूर्वपुण्योघे॥दशवदनांतकरूपेचेतश्चिरमास्वराघवेरूपे॥८१॥किं
तवधनसुतजायामायामयरूपचिंतयाप्यनया॥अनयायानंदमयेकिमयेरमसेनघवेचेतः॥८२॥ ॥

स्यर्थः॥८१॥इदानींमिथ्याभूतविषयचिंतनेनतवपुरुषार्थसिद्धिर्नास्तीत्याह॥किंतवेतिहेचेतः तवधनसुतजायामायामय
रूपचिंतया॥धनंद्रव्यंसुतःपुत्रःजायास्त्रीरियंमायामयंमिथ्यारूपंतस्याचिंतयाध्यानेनकिंकिमपिप्रयोजनंनास्तिअनयेतिप्रत्य
क्षमनुभूयमानयेत्यर्थः॥हेचेतअनपायानंदमयेक्षयानंदप्रचुरेराघवेअयेइतिचेतोविशेषणंकिंनरमसेकुतोनक्रीडसि॥
॥८२॥

पुनरपीचेतः प्रार्थनमेवकरोति॥ त्यजनिजगजवाजिकथामिति॥ त्यजनहीति॥निजगजवाजिकथांस्वसंबंधिनींगजवाजिकथांहस्तिहयकथंवार्ता जठरेखोदरेगजदूहंतंभजंविख्यातंजनमारिरहितंरामंभजेतिहिरूक्तिरादरार्थेनिनुविनिश्चयेनचेतः मानमानसतत्प्राप्यारामप्राप्यास कलंसर्वकामजातंप्राप्स्यसिनवेपरिश्रमेण पृथाविषयचिंतनेनसर्वकामावाप्तिः सकलमनोरथसर्वभवतीतिभावः॥८३॥पुनरपिचेतःप्रा

त्यजनिजगजवाजिकथांभजभजजठरेजगदूहंतमजं॥तत्प्राप्याननचेतः प्राप्स्यसिसकलंनवेपरिश्रमेण॥
हितमात्रंवाछसिचेत्तन्मंजूषांग्रहाणरामाख्या॥नोचेच्चंचलशीलैर्वंचितमसिचित्तदुर्लभैर्विषयैः॥८४॥

र्थनमेवक्रियते हितमात्रमिति हेचेतस्त्वंहितमात्रंवाछसिचेत्स्वंहितंप्रियमिछसिचेद्यदितर्हिरामाख्यारामनामिधामंजूषांपेटिकांजु षस्वसिवयंगृहाणेतिपीठेस्त्रीकुरुनोचेद्रामनाममंजुषासेवनेनविनाचंचलशीलैश्चपलस्वभावैर्विषयैर्धनादिभिर्वंचितंप्रतारितमसि विषयेष्वासक्तंभविष्यसितेनानर्थसमूहेनिमज्जसीत्यर्थः॥८४॥ ॥ ॥ ॥ ॥ २९

इदानींजगदुत्पत्तिस्थितिलयकारणसमर्थं॥ मीश्वरंविहायान्यंमाभजेत्याशयेनाह॥कर्तुमिति॥कर्तुं।मुत्पादयितुंमकर्तुंअनुत्पादयितु मन्यथाकर्तुंवैपरीत्यंकर्तुंसकलंसर्वंजगद्योशक्तः समर्थस्तंविहायरामंमानसान्यस्मिन्ईश्वरभिन्नपदार्थकाममभिलाषंमाधीहि माकुरुवेत्यर्थः॥अन्यत्रासक्ततयाभिलिषितसिद्धिस्तवनास्तीतिभावः॥८५॥एवंमनसः प्रार्थनाकृतातथापिप्रमाथिभवत्यतए तद्दोषदारिद्र्यदावानलापहरणसामर्थ्यरामस्यैवास्तीतिज्ञात्वेदानींसर्वशक्तिमान्रामःमेघःमयिरूपापांगदृष्टिंकरोत्विति प्रार्थय

कर्तुंमकर्तुंशक्तः सकलंजगदेतदन्यथाकर्तुं॥यस्तंविहायरामंकामंमाधेहिमानसान्यस्मिन्॥८५॥
दारिद्र्यदावशांत्यैवर्षतुकरुणाकटाक्षनीराणि॥नित्यंकुस्थितनिष्कलंकश्चनवैकुंठमंडनंमेघः॥८६॥

ते॥दारिद्र्यदावशांत्यैरिति॥दारिद्र्यमेवदावोदावानलस्तस्यशांत्यैशमार्थंवर्षतुकरुणाकटाक्षाएवनीराणिकरुणाकटाक्षाएवजला निवर्षतुमेघः कथंभूतोराममेघः नित्यंकुस्थितत्वात्निष्कलत् नित्यंनिरंतरंअंकेस्थितानिष्कलायस्यसः निष्कलुषमेयालक्ष्मीः सीतेत्यर्थः एतादृ शोवैकुंठमंडनंवैकुंठभूषणंमेघोजीवनदः॥८६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पुनरपिप्रार्थनांकरोति॥स्मेरमुखांबुजंमंदहसितमुखारविंदमुद्यंनवनीरदनीलमुदितरुणमेघश्यामंमिंदिरागेहंलक्ष्मीनिवासंपरिहरतु॥दूरीकरोतुदुःखजालंक्लेशसमूहंजातमितिपादेदुःखसमग्रंकिमपितेजःधामकिंलक्षणंतेजइनवंशसंभूतं सूर्यकुलसंभवंरामचंद्राख्यंमित्यर्थः॥८७॥ ॥ननुतवसगुणेनकिंनिर्गुणेतूष्णींमास्कृतिष्ठेतिचेत्ततवतथेवास्कृ मम त्वयिमेवास्त्वित्यभिप्रायेण पुनरपिरामविषयि

स्मेरमुखांबुजमुद्यंनवनीरदनीलमिंदिरागेहं॥परिहरतुदुःखजालंतेजःकिमपीनवंशसंभूतं॥८७॥
सरयूतीरपुरीशेसकरेशगिरिशादिपूज्यपादपीयूषे॥वैदेहीहृदयेशेममभक्तिरिहास्कुमानुषवेषे॥८८॥

ण्येवभक्तिरस्त्वितिवदतिसरयूतीरपुरेशइति सरयूतीरपुरेशयोध्यानगरस्वामिनी)सकरेशगिरीशादिपूज्यपादपीयूषेशतमखेशानादिसकरैः पूज्यंपादपीयूषंचरणांमृतंयस्यतस्मिन्वैदेहीहृदयेसीतापतौमानुषवेषेमायामानुषरूपधारिणि ममभक्तिरिहास्त्वित्यस्मिन्नूराघवेदि
त्यर्थः॥८८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २१

इदानींपूर्वोक्तभक्तिप्रकर्षविशुद्धस्वांतविभूतिश्रीरामध्यानमानंदरूपत्वेनवर्णयति॥दशरथनंदनरामेति॥दशरथनंदननामा दशरथस्यनंदनकुमारोभिधःचंदनधामाशीतलद्युतिःकिंलक्षणःरमतांहृदयेक्रीउनाभिनंदनःआनंदकरएतादृशउदितःसन्हृदयेआविर्भूतः॥सन्कश्चनमोदःस्वरूपाविर्भावलक्षणआनंदःदांतंस्वच्छमवत॥दानःसितोगौरइत्यभिधानात् मदीयंहृ

दशरथनंदननामाचंदनधामाभिनंदनोरमतां॥मरपतिमदीयमुदितःकश्चनमोदोहृदंतरेतां॥८९॥
रामाभिधाभिरामाश्यामामेमानसंसमासाद्य॥मैत्रीकापिधात्रीपुत्रीप्राचीनधर्मलब्धास्ते॥९०॥

दंतरंस्वांतांतरंमदयत्संतरमाल्हादयति॥८९॥इदानींस्वरूपंप्रकारांतरेणवर्णयति रामाभिधानोमनामिकाभिरामामनोहराश्यामेंदीवरश्यामलाधरत्रीपुत्रीप्राचीनपुण्यलब्धासीतापूर्वार्जितपुण्यपरिपाकप्राप्तकाप्यपूर्वामैत्रीप्रीतिःममानसंममहृदयंप्राप्यास्तेतिष्ठति॥९०॥ ॥ ॥ ॥ ॥ ॥

पुनरपिध्यायेद्राजानुबाहुमेतध्यानंप्रकारांतरेणवर्णयति॥वामांगसंगसंगिविद्युन्मालमितिसंगेविद्यतेयासांताः संगिन्यः संगिन्यश्च
ताविद्यतश्चसंगिविद्युतः संगिविद्युतांमालासंगिविद्युन्मालास्वांमांगस्थसंगेविद्यतेयस्याःसावामांगसंगा वामांगसंगा अलंका
रादित्वतासीतेवसंगिविद्युन्मालाविद्यतेयस्यतद्वामांगसंगसंगिविद्युन्मालंवामांगसंस्थितासीतालक्ष्मणेवसंगिविद्युन्मालातया
शोभितमित्यर्थः॥वामांगसंगविद्युन्मालमितिपाठेऽगमप्यनीलस्वशरीरकांत्याविलंघितानगंतिरस्कृतंकंदर्पमेतादृशंदशरथ
पूर्वभवपुण्यंस्मरुतंपश्यतामवलोकयतकिंलक्ष्मणंपीयूषपूरितापांगममृतपूर्णावलोकं॥९१॥इदानींपंचायतनविशिष्टंवामभा

वामांगसंग॰॰द्युन्मालंनीलंविलंघितानंगं॥दशरथपूर्वजपुण्यंपश्यतपीयूषपूरितापांगं॥९१॥
अनिलतपःफलमग्रेपृष्ठेस्नेहंस्नेहंसचामरछत्रं॥पार्श्वेभक्तिविशेषोमध्येतडिदंबुदावहं वंदे॥९२॥

गिसभासीनामितियध्यानंतद्वर्णयति॥अनिलतपःफलमिति॥अनिलतपःफलहनूद्रूपमग्रेपुरतःपृष्ठेस्नेहंस्नेहविशिष्टंलक्ष्मणंकिंलक्ष्
णंस्नेहंसचामरछत्रंचामरछत्रंयुक्तंपार्श्वेसमीपेदक्षिणोत्तरभागेभक्तिविशेषोभक्त्याकर्षविशिष्टोभरतशत्रुघ्नौमध्ये मध्यभागेतडि
दंबुदौतडित्सदृशीसीताअंबुदसदृशोरामः सीतारामौतडिद्राभमंबुदमितिपाठेतडिद्राभंविद्युत्सदृशसीताद्योतितमेतादृशंविलक्ष्
णतौमंबुदंमेघंरामरूपंवंदेनमस्करोमि॥९२॥ ॥ ॥ ॥ ॥ ॥ ॥ २२

पुनरपिप्रकारांतरेणस्तौति॥इंदीवरदलनयनंनीलोत्पलदलनेत्रंजलदावलिमंजुमेघसंघमनोहरंसुंदरंचारुरुचिरंमनोज्ञंमंजुमंजुलमि
तिअमरः मंजुलापांगंसुंदरावलोकंमंदीकृतदशवदनंपराजितरावणंदीनमहोदयंभक्तरक्षणायाविर्भूतंतंजयंजयस्वरूपंवंदेप्रणोमि॥
॥९३॥पुनरपिवामेवामेलसद्भामेतध्यानंप्रकारांतरेणस्तौति॥वामेकांचनवल्लीवामभागेसकनर्णलता॥सीतालक्ष्मणा॥सल्लीलः॥सवि
लासः अन्यत्रदक्षिणेकांचनः सकवर्णाभः विटपी तरुर्लक्ष्मणः अनयोर्मध्येयःहरिनीलकंदलोद्रेकः समानसकमलेमनः कमल

इंदीवरदलनयनंजलदावलिमंजुमंजुलापांगं॥मंदीकृतदशवदनंदीनमहोदयंजयंवंदे॥९३॥वामे
कांचनवल्लीसल्लीलोन्यत्रकांचनोविटपी॥विलसतिमानसकमलेमध्येहरिनीलकंदलोरेकः॥९४॥

कर्णिकायांविलसतिसचैत्कर्षेणशोभतेइत्यन्वयः दुःखजातंहरतीतिहरिः रामएवनीलः श्यामवर्णःकंसकंदतीतिकंदः कंदएवकंदलः तस्योद्रेकः
आधिक्यंसहरिनीलकंदलोद्रेकइतिविग्रहविटपीचेत्कर्तीतरासकवर्णाभःलक्ष्मणः मध्येविटपीचेत्कर्तीतरासकवर्णाभः लक्ष्मणःमध्येविटपीचे
त्कर्तीतरासकवर्णाभःलक्ष्मणः मध्येविटपीकिंलक्षणःहरिनीलकंदलोद्रेकः हरिनीलेंद्रमणीनांकंदलोद्रेकः शोभाधिक्यंतद्रंगयुक्तिर्यस्यसः
कंदलाअंकुशःनेशामुद्रेकउद्भवोयस्मादितिबाविग्रहः॥९४॥ ॥ ॥ ॥ ॥ ॥

पुनरपिजननीरूपत्वेनस्तौति॥कमलायमाननेत्रमिति॥कमलायमाननेत्रांपंकजसदृशनेत्रामममलायतबाहुसंगिकोदंडांनिर्मलदीर्घबाहुसक्त
कार्मुकांशमलावण्यधरित्रींशांतिस्फुलावण्यधरामेतादृशंपुंवेषधारिणींपुरुषवेषधरांजननीं मातरंवंदेनमस्करोमि॥९५॥पुनरपि

कमलायमाननेत्रामममलायतबाहुसंगिकोदंडैः॥शमलावण्यधरित्रिंजननींपुंवेषधारिणींवंदे॥९५॥
पत्निःशरधनुराद्यासंपत्तियोगयोगिनामीड्या॥स्फुरतिस्फपिनविपत्तिःकांचनपित्तिर्ममानिशंचित्ते॥९६॥

प्रकारांतरेणस्तौतिपत्तिरिति॥पत्निःपादचारिणी॥शरधनुराद्याबाणकार्मुकयुक्तासंपत्तिःपूर्णतायोगयोगिनांयोगेनयोगिनोयोगयोगिनस्ते
षांसमाधिभाजामित्यर्थः॥ईड्यास्तवनार्हापक्षपतितविपत्तिर्नाशितदैन्यापित्तिर्हानावस्थाकांचनापूर्वाममचित्तेनिशंतिरंतरंस्फुरतिप्रकाशते॥ २२
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥९६॥

पुनरपिप्रकारांतरेणस्तौति॥हीरमनोहरदशनेति॥हीरमनोहरदशनाहीरकमणीतुल्यरमणीयदंतादशशतकरवंशभूषणंसूर्यवं
शालंकरणंकांचनकापिकाचमणीनांनीलमणीनांरत्नानांराशिरूपालीलालसंस्वभावालसंचापल्यरहितंममनःकुरुतेलीलालय
मितिपाठेलीलायाःक्रीडायाःआलयंस्थानं॥९७॥ ॥पुनरपिसन्नधःकवचीतिध्यानंप्रकारांतरेणस्तौति॥तूणीकवचरूपाणीति॥
तूणीकवचरूपाणीतूणीतूणीरःकवचंतनुत्राणं रूपाणीरसिरेतैर्युक्ताविशिखासनबाणमंजुलामनोहरायांतीगच्छंतीमंजुलाना

हीरमनोहरदशनारत्नशतकरवंशभूषणंरचना॥कांचनकाचमणीनांनीलालीलालसंमनःकुरुते॥९७॥
तूणीकवचरूपाणीविशिखासनबाणमंजुलायांति॥वेणीकापिगुणानांमेणीदृगुपांतचारिणीजयति॥९८॥॥

गीतिपदेविशिखासनंधनुर्बाणःशरस्ताभ्यांयुक्ताचासौमंजुलापांगीचमनोहरायांतीमच्छंतीवलोकागुणानांवेणीगुणगुंफितताकाप्यपूर्वे
तादृशीएणीकुरंगीममदृगुपांतचारिणीदृष्टिपथंगताजयतिसर्वोत्कर्षेणवर्ततेयद्वाणीकुरंगीतस्याःदृगुपांतेदृश्यत्रेगच्छंतीदशगुणा
नावेणीजयति॥९८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पुरपिप्रकारांतरेणस्तौति॥आननेति॥आननेत्यादि॥आननेनिर्जितचंद्रेति॥आननेनिर्जितचंद्रामुखकांत्यातिरस्कृतशशिबिंबासांद्रानंदैकभूमिः॥सांद्रोनिबिडो यआनंदस्तस्यभूमिरधिष्ठानंउन्निद्रनिद्रारहितात्मकाशरूपेत्यर्थः॥विगलितनंद्रोत्साहरूपेत्यर्थः॥निद्रांतयोः सामानार्थत्वेपिकेचिद्भेदेनगंतव्यः एतादृशीरावणविद्राविणीरावणनाशकरीकापिमुद्रास्फूर्तिर्ममानसंरमयतिअल्हादयतीत्यर्थः॥९९॥ ॥

आननेनिर्जितचंद्रासांद्रानंदैकभूमिरुन्निद्रा॥रमयतिविगलितनंद्रारावणविद्राविणीतियामुद्रा॥९९॥
पाथोधिबद्धसेतुंनक्तंचरनाशपिशुनसत्केतुं॥आपरमंतंनेतुंकंचिच्चिन्मोरकंदलंवंदे॥ ॥ ॥ ॥१००॥

पुनरपिप्रकारांतरेणस्तौति॥पाथोधिबद्धसेतुमिति॥पाथोधिबद्धसेतुंसमुद्रेनिबद्धसेतुंनक्तंचरनाशपिशुनसत्केतुंराक्षसनाशसूचकध्वजमेतादृशंशंचिच्चिन्मोरकंदएवकंदलस्तमपूर्वचैतन्यहर्षकंदमापदंविपक्षिंअंतंनेतुंवंदेप्रणौमि॥१००॥ ॥ ॥ २६

पुनरपिप्रकारांतरेणस्तौति॥अभिनवपल्लवशयनामिति॥अभिनवपल्लवशयनोंअभितः नूतनपल्लवैः कृतशय्यांशयनंतुनिविष्टविद्रुद्रुलासांशयनोपरिस्थितद्रुद्रुलांविस्फुरन्मानजानकीतस्यामुद्रासोमेमायस्याएतादृशींलांकांचननिकुरंबांकस्थितशिरसंसीतायाः स्फुरवर्णादर्शयोंकस्तस्मिंस्थितमसकामेतादृशींकांचित्कामपिलीलांशृंगारावस्थामर्थयेप्रार्थये॥१०१॥पुनरपिविषवल्लीरूपत्वेनस्तौति॥कुटिलाशयविषवल्लीमनुजमानसनाशेकलतांजटिलांजटाभारमुक्तांजटामुकुटमंडितामित्यर्थः॥ निबिडोल्लसत्कूमांबुकणांसांद्रशी

अभिनवपल्लवशयनांशयनांतनिविष्टविद्रुद्रुलासां॥कांचननिकुरंबांकस्थितशिरसंकांचिदर्थयेलीलां॥१०१॥
कुटिलाशयविषवल्लीजटिलांनिबिडोल्लसत्कूमांबुकणां॥वल्कलकल्पितवसनांरावणवधवासनांमुदा वंदे॥१०२॥

भायुक्तकूमजस्वेदांबुशीकरानिबिडोल्लसदितिपाठेभालेउल्लसंतःशोभमानाःमौक्तिकांबुकणाःशीकराविंदवस्तेयुक्तामित्यर्थः॥ वल्कलकल्पितवसनांभूर्जत्वगादिपरिधानामेतादृशीरावणवधवासनांदशाननक्षयवासनामहंमुदाहर्षोत्कर्षेणवंदेनमस्करोमि॥१०२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पुनरपिमायारूपत्वेनस्तौति॥अकपटपटुकपिकटकामिति॥ निष्कपटकुशलयानरसेनानटकामितयानटाभिनयेछयाअभिनीतं दर्शितंवैकक्ष्यंनिकालतायथासालदुचितंवैकक्ष्ययोग्यमुपचारचयंप्रकारसमूहंरचयंतींकुर्वतीमेतादृशीकांचित्कामपिमायामा यांशक्तिंअर्थयेप्रार्थये ॥१०३॥पुनरूपीप्रकारांतरेण लतारूपत्वेनस्तौति॥ अंबरमणिकुलभूषामिति॥अंबरमणिकु

अकपटुपटुकपिकटकांनटकामितयाभिनीतवैकक्ष्यां॥तदुचितमुपचारचयंरचयंतींकांचिदर्थयेमायां॥१०३॥
अंबरमणिकुलभूषांशंबरारिपुवैरिभक्तिमंजूषां॥कामपिकामपिकानांरसालललतिकांनिकाममवलंबे॥१०४॥॥

लभूषांसूर्यकुलालंकाररूपांशंबरारिपुवैरिभक्तिमंजुषांशंबरारिपुःकामस्तस्यवैरीशिवःतत्कृतायाभक्तिस्तस्याःमंजूषांपेटिकांकामप्यपू र्वांकमपिकानांकामाएवपिकाःकोकिलाःधर्मार्थाकाममोक्षरूपास्तेषांरसालललतिकामाम्रलतांनिकाममतिशयेनावलंबेसमा श्रये॥१०४॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ २५

पुनरपिप्रकारांतरेणभूधरत्वेनस्तौति॥स्फुरसरिद्वरजचंचच्चामरकरसोदरानुगतमिति॥स्फुरसरिद्गतस्याःसोदरंसदृशत्वेनस मानंयच्चामरंतत्करेयस्यतादृशोयःसोदरोबंधुस्तेनानुगतंसहितंकिंचिदुंचितचंपकचैलंकिंचिदुंचितंप्रकाशितंयच्चंपक पुष्पवच्चैलंवसनंएतादृशंकिंचित्रिपाठेकंचिदपूर्वभूधरंस्फुरनीलंश्यामंशैलंभूधरंअवलंबेसंश्रये॥१०५॥पुनरपिप्रकारां

स्फुरसरिद्वरजचंचच्चामरकरसोदरानुगतं॥कंचिदुंचितचंपकचैलंशैलंस्फुरनीलमवलंबे॥१०५॥
आकर्णरुष्टचापंवर्षंतंबाणवृष्टिमुत्तमांगेषु॥नंदेयोगिदुरापंकंचनहुंकारसुंदरंकोपं॥॥॥१०६॥

तरेणक्रोधरूपत्वेनवर्णयति॥आकर्णरुष्टचापमिति॥आकर्णंकर्णोपांतपर्यंतंकृष्टमाकर्षितंचापंधनुर्येनसःआकर्णरुष्टचाप स्तमाकर्णाकृष्टचापंपुनः॥कथंभूतंबाणवृष्टिमुत्तमांगेषुवर्षंतंशत्रुमूर्धस्थमस्तकेषुबाणसंतापंकुर्वंतमित्यर्थः॥पुनःकथंभूतं योगींदुरापंयोगीश्वराणामपिकृच्छ्रलभ्यंएतादृशंकंचनमपिहुंकारसुंदरंकोपंवंदे॥१०६॥ ॥ ॥ ॥ ॥ ॥

पुनरपिप्रकारांतरेणवर्णयतिखंडितहरकोदंडेति॥खंडितंशकलीकृतंहरकोदंडंशिवधनुर्यया सा खंडितहरकोदंडाब्रह्मांडकरंडमंडनीभूताब्रह्मांडमेवकरंडस्तस्यमंडनीभूतालंकारणभूतापुनादृशीवैदेहीगलमालासीताकंठसक्कास्तकविलसतिशोभते किंभूताविभक्तांगीभिन्नशरीरासीतागौरांगीत्यर्थः॥यद्वाभिन्नाशक्तिमनोरभेदादथवाविशेषणभक्तेषुअंगंस्वरूपस्थिति र्यस्याः साउक्तंचवाल्मीकीनाशांतानांसमदृष्टीनाअद्वेष्टानांचजंतुषुतामेवभजंतांनित्यंहृदयंतेषिमंदिरंदृनियद्वाविशेषे

खंडितहरिकोदंडब्रह्मांडकरंडमंडनीभूता॥वैदेहीगलमालाविलसतिनीलाविभक्तांगी॥३०७॥धनु
षारिपुजयजनुषारुचिरतराकारनिर्जितांबुधरा॥तरुणारुणनिभचरणाकांचनकरुणारुणश्रिमेहृदयं॥३०८॥

णभक्तापेक्षंअंगंस्वरूपंयस्याः साउक्तंचभगवतानीलाख्मेवमेमतमिति॥३०७॥पुनरपिप्रकारांतरेणकरुणारूपत्वेनवर्णयति॥ धनुषेति॥धनुषशरासनेनकिंलक्षणेनधनुषारिपूजयजनुषाशत्रुजयजन्मवतारुचिरतरीतिसुंदराकारनिर्जितांबंधुराःआका रआकृतिस्तयानिर्जितोधारीकृतोंबुधरोमेघोयासपुनः किंभूतातरुणातरुणनिभचरणारक्तपद्मपंकजायद्वातरुणोयो रुणःसूर्यःसारथिस्तदुदयपद्माकांचनकाप्यकरुणामेममहृदयंकरुणरिव्याप्नोतिव्याप्यतिष्ठतीत्यर्थः॥तयाविनान्यत्किंचि

दपिनभातिनभासतइतिभावः॥३०८॥माघयमेघोमेघोविद्युत्सीतांबरप्रवरः॥जीवनदातासविताहृदयाकाशेसदाममोल्लसत्॥ध नुर्बाणधरंधरंदशाननविमर्दनं॥प्रफुल्लनयनांभोजंभजेदशरथात्मजं॥पादार्थद्योतनीचेंदीपिकार्थानुकूलिनी काकभट्टैःकृपि तास्तस्कखाष्टेमुदास्फुटं॥इतिश्रीमहामुकुलभट्टविरचिताष्टाधिकशतश्रीरामार्यास्तवपदार्थदीपिकासंपूर्णं॥ ॥ ॥

यात्वराद्रौपदीत्राणेयात्वरागजमोक्षणे॥मय्यार्तेकरुणामूर्तेसात्वराङ्गताहरेः॥३॥आपदामप
हर्तारंदातारंसर्वसंपदां॥लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहं॥२॥समुद्रवपना
वनिविद्युन्मुकुटवर्णिना॥आर्यश्रीरचितप्रेम्णामहामुकुलसूरिणा॥३॥ ॥ ॥

यस्याःपरेप्रथमेदशमात्रस्तथातृतीयेपि॥अष्टादशद्वितीयेचतुर्थकेपंचदशसार्या॥१॥आर्यापूर्वार्धसमंद्वितीयम पिभवतीयत्रहंसगते॥२॥श्रीसीतारामयंत्रार्पणमस्तु शके १७९१ शुक्लसंवत्सरचैत्रअसीतनवमीरविवासरदिनेसंपूर्णं पत्रफलेउक्तनामकविष्णुसूनूनारायणेनलिखितंपुस्तकंदृष्ट्वाग्रंथसंख्या ॥१०००॥ ॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ इतिश्रीमुद्गलाचार्यकृतआर्यासंपूर्ण॥श्रीरामचंद्र॥